VIII

"केशवी" ज्योतिष

९

श्रीनृसिंहपदांभोजभ्रमरीकृतमानसः
ज्योतिर्विच्छंकैस्वोपूंज्ञायतांहोरिकेबुधैः

x
९

(2069)

के.टी.
१

ॐ

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीनृसिंहप्रसन्न ॥
केशवोक्तिजनुर्मार्गोद्देशं नारायणः स्फुटं ॥ तनोति सन्मतिप्रीत्यै
नत्वा मल्लारिपुं गुरुं ॥१॥ आरंभे विशिष्टशिष्टाचारानुमतः श्रु
तिबोधकर्त्तव्यताकं निर्विघ्नग्रंथसमाप्त्यर्थं कृतकायवाङ्म
नोभिः गणेशादिनमस्कार रूपं मंगलं शिष्यशिक्षायै
निबध्नाति ॥ ॥ नत्वेति ॥ ॥ नमस्कारस्य कर्त्तव्यत्वात्क्रियापू कां
र्वकालत्वात्क्त्वो निर्देशः ॥ अहं केशवो जातपद्धतिं कुर्वे इत्य क
न्वयः ॥ जातकस्येदं जातकं यद्यपि वहुछे जातीयमिति भा
व्यं ॥ तथापि नायं शैषिकप्रसयांतः किंतु स्वार्थिकप्रसया
न्त एवोपचारात्तदीयवर्तते ॥ गोपस्य स्त्री गोपिकादिवत् ॥

च्युतशिवब्रह्मार्कमुख्यग्रहान् ॥ विघ्नपः ॥ श्रीगणाधिपः ॥
शारदा श्रीसरस्वती । अच्युतः नारायणः । शिवो महादे
वः । ब्रह्मा चतुराननः । अर्कमुख्यग्रहाः सूर्यादयो ग्रहाः ॥
थंभ· एतान्नत्वा ॥ कुजातक· स्फुटतरां प्रकरार्थां ॥ कस्मै कारणा
य । ज्योतिर्विदां । प्रीतये ॥ अथात्र कर्त्तव्यसंक्षेपत आह ॥ यं
त्रैरिति ॥ अत्र जातकपद्धतौ जन्मसमये [redacted] यंत्रैः
घटीशंकुफलकादिभिः स्पष्टतरः ॥ सूक्ष्मो वेधो ज्ञातव्यः ॥
प्रथममिति शेषः ॥ तद्यथा दिने यदि मध्याह्नात् सर्वं जन्मभ
वति ॥ तदा दिनगतसमयो ज्ञेयः ॥ मध्याह्नोत्तरं जन्मदिन
शेषसमयो ज्ञेयः ॥ यदि रात्रौ वर्द्धरात्रात् सर्वं जन्म भवति ॥

स्यछुंचतत्संयोगादाख्यायमितिसूत्रेकैक रादियंथेषुंजातस्य
बालकस्यइदंपूर्वजन्मांतरार्जितसदसत्कर्मजनितशुभाशु
भफलनिरूपकंशास्त्रंजातकमित्युच्यते॥जातकस्यजातक
शास्त्रस्यपद्धतिंमार्गक्रमेणनिरूपयामित्यर्थः॥यद्वाजातं
मुसर्वंकं॥शिरोयस्मिन्कालेतज्जातकं॥तेजन्मकालम
धिकृत्यलोकानांफलंशुभाशुभंसूचकंशास्त्रंजातकमित्यु
च्यते॥तस्यपद्धतिंमार्गमित्यर्थः॥वक्ततोजातस्यकायपति
प्रतिपादयतीतिजातकं॥केशब्दे॥अस्मान्मुलविभ्रजादि
त्वात्कः॥त्रिपुरुषानुकर्मिवत्॥कर्मलोक्त्यसूत्रयत्रयेत्रापि
योग्यताविवशादिति ॥किंकृत्वा॥कान्॥विघ्नपश्वारदा

त्ति

केरा· ४ नार्द्धे नयुक्तं राशौ पश्चिमनतं स्यात् ॥ तत्र त [illegible] गतं उ·
चतुस्त्रयस्त्रिंशच्छुद्धं तदुन्नतं भवति ॥ तद्यथा ॥ पूर्वनतं त्रिंशच्छुद्धं पूर्वो
न्नतं भवति ॥ पश्चिमनतं त्रिंशच्छुद्धं पश्चिमोन्नतं भवति ॥ अ
थ दशमलग्नसाधनं ॥ ॥ पूर्वोन्नते षड्भयुक्तरवेः पश्चान्नते केव
लादिसतो लंकोदयैर्लग्नमिव साध्यते ॥ तत्साध्यं दशमं भवति
तत्सषड्भं षड्राशियुक्तं सुखं चतुर्थं भवति ॥ ॥ अथ मंदा
पो वबोधोदाहरणक्रमो लिख्यते ॥ संवत् १६४४ शालिवाहनश
के १५०९ वृषादेऽतांसि नवप १श्रानो घटिकाः ३१ पलानि ९३
भिवनि० १५० परतो भरणि नक्षत्रं संपूर्णं० वज्रयोग घ० १४
प० १ अत्र श्रीसूर्योदयाद्गत घटिपले सु० १४।१४ धनुर्लग्ने श्री
मतो जन्म ॥ अथ मध्यग्रहसाधनार्थं महर्गणाः लिख्यंते ॥

नं करणादेव प्रसिद्धं ॥ अथ दशमभावसाधनं तत्साधनाय नतो
न्नतसाधनं चाह ॥ रात्रेः शेषमितं युतं दिनदलेनांशे गतं शेष
कं विश्लेष्य खलु पूर्वपश्चिमनतं त्रिंशच्युतं चोन्नतं ॥ यस्त्वो
न्नतषड्भयुक्तरवितः पश्चान्नतादिस्ततो यल्लंकोदयकैश्च
लग्नमिव तन्माध्यं सषड्भं सुखं ॥२॥ ॥रात्रेति॥ ॥रात्रेः
शेषं घटिकादिकं ॥ तथा रात्रेर्इतं ॥ गतं ॥ दिनदलेन ॥ दिना
र्द्धेन युक्तं ॥ क्रमात्पूर्वपश्चिमनतं भवति ॥ अह्नः ॥ दिनस्य ग
तं ॥ [redacted] शेषकं ॥ दिनार्द्धेन विश्लेष्यं क्रमात्पूर्वपश्चि
मनतं भवति ॥ एतदुन्नतं भवति ॥ निशीथादूर्ध्वं रात्रिशेषं दि
नदलेन युक्तं रात्रौ पूर्वनतं स्यात् ॥ निशीथादर्वाक् रात्रिगतं दि

थ

के० ५ ल्यष्ठ्रकपिंड:॥ सइह भवतिसक्षेप्यागोसष्टिरामाष्ठभुजगशरबा उ० २

क णाकेंदु१२५५८८३७१२ युशकाब्द:॥२॥ नागरामभुशरवेदषशर

क्ष्मा१५६४५ ३८ युतो दिनगण: कृत एलं॥स्यादयकेलिभुखौ

ग्रह	र	चं	उ	मा	मं	बु	गु	शु	श	के	मह	न	बु	म	[illegible]	शा	थगोच
मध्यमग्रह	६ ७ ५ ३२	० २२ २९ ५५	५ १ २ ३०	५ १० २ २०	६ ६ २५ २८	६ ७ ४० ३२	३ ३ २५ ५७	६ ७ ५५ ३२	० ० २७ १०	११ १० २ २६	[illegible]	६ ७ ४० ३२	२ ० ५० ५२	६ ७ ४५ ३२	२ ० ३ ६	६ ७ ४३ ३	सामं षेयुतारा कोवर्ष
गतय	५९ ८	७९० ३५	५५८ ११	[illegible]	[illegible]	५९ ८	५ ०	५९ ८	२ ०	३ ११	शीघ्र	५९ ८	२४ ३२	५९ ८	६६	१२	ष्टरा:

॥३॥ अथबीजदेशांतरादिसंस्कृतांस्तात्कालिकारव्यादयोमध्य

मा: लिख्यंते सगतिका:॥ ॥चरखंडानि ४७।३७।१६। ताका

लिकंचर ३६ दिनमानं २८।४८। दिनार्द्धं १४।२४। रात्रिमानं ३१।१२ ५

रात्र्यर्द्धं १५।३६ अयनांशा: १७।४९ दधियामेपलभा ४।४० अथ

तात्कालिकग्रहसाधनार्थं चक्रं ६ अधिमास: १ ऊनाह: १ अहर्गराम

ए: ८०५

तत्रकल्पगताब्दाः १९७२९४८९९८ कल्पाहर्गणः ७२०६३९१
५५२३८ सृष्टितोगताब्दाः १९५५८८४९९८ सृष्ट्यहर्गणः ७१
४०४००९१५१ कलिगताब्दाः ४६९८ कलेरहर्गणः १७१२३२
२८ ब्रह्मतुल्येगताब्दाः ४०४३ अधिमासाः १५० मासगणः ५०
०४ अवमानि ७३४९ अहर्गणः १४७११८६ अत्रकल्पादिगता तो
ब्दानांदिनगणानांचसाधनार्थंसुगमोपायः कृष्णदेवज्ञगुरु
चरणैःक्रियते ॥ ॥ करशरयुगससा [illegible] भ्राभ्रपूर्वान्दि दृ
ग षट्स्वद्विवेदरसहितश्चेत्तब्रह्मतुल्याब्दपिंडः ।१७२०६३९६००
७४५२॥ सहरहभवति कल्पात्तदुदकाद्रिभूमीनवेदसोपे गसुभ
ध्यंकभः १९७२९४७९७८ युक्स्यात्कोब्दे ॥ शरररसगुणभूषणा
गरामभ्राभ्रवेदांबुधिशशिनग ७१४०३८६९३८५ युक्तोब्रह्मतु

केरा.
२

शनिः॥ शीघ्रांकेंद्रमज्ञार्यमध्यगमितीभेयांतिदत्तुल्यतांसिद्धै उ.
स्तैरिहपर्वधर्मेनयुसस्कार्यादिकंसाधिशेत॥ इहजन्मसमयु
द्गमेलग्नं॥ स्वदेशीयोदयेःसाध्यं तत्साधनमुक्तंप्रस्तुत्ये
तात्कालिकोर्कीयनभागयुक्तस्तद्भोग्यभागैरुदयोहतःस्वः॥
स्वाग्न्युद्धृतस्तं रविभोग्यकालंशोधयेदिष्टघटीपलेभ्यः॥ १॥ बि
तदग्रतोराश्युदयांश्चशेषमशुद्धहृत्स्वाग्निगुणंलवाद्यं॥
अशुद्धपूर्वैर्भवनेरजाद्यैर्युक्तंतनुःस्यादयनांशहीनं॥ भो
ग्यांशकालेखगुणाहृतेर्कः स्वीयोदयासांशयुतोविल
ग्नं॥ रात्रीष्टकालेतुसषड्भसूर्याल्लग्नंततोप्युक्तवदिष्टका
लेइति॥ एवंजन्मसमयेउद्गमःकार्यः॥ सःउद्गमःसषड्भः
षड्राशिप्रक्तोऽस्तसंज्ञःसप्तमभावोभवति॥ तत्रग्रहसाध २

तदा रात्रिगतकालो ज्ञेयः॥ [redacted] निशिथादूर्ध्वं रात्रि
शेषकालो ज्ञेयः॥ अत्र जन्मसमये खेटाः ग्रहाः स्फुटाः॥ यस्सक्षे
णु घटंते॥ आकाशे दृक्तुल्या भवंति तेन पक्षेण वेद्याः॥ तद्दृ
कंसमोदरपद्धतौ॥ यांति संसाधिताः खेटाः येन दृग्गणितैक्य
तां॥ तेन पक्षेण ते कार्याः स्फुटास्तत्समयोद्भवा इति॥ स्फुटा इ
स्फुटपत्रकसरणं॥ मध्यमा ग्रहाः शीघ्रोच्चान्यपि वेद्यानि सपिवा
ध्यं॥ चेष्टाकेंद्रसाधने उपयोगात्॥ ते स्फुटा ग्रहा विद्यमान
घटनामवलोक्य वेधेनांतराणि लब्ध्वा पित्वाऽचार्यैः साधिता
स्ते ग्रहलाघवे निबद्धाः॥ सौरोक्तोऽपि विधुरुच्चमंककृतिको
नाङ्गो गुरुस्त्वार्यजो सृग्राहू च कजांत्यकेंद्रमथार्यसेषुभागः फ

[illegible]

जन्मलग्नमये खेटा: ग्रहा: स्फुटा: पत्पक्षेण घटं ते आकाशे दृक्तुल्या भ-
वंति ॥ तेन पक्षेन वेद्य: ॥ तदुक्तं दधिग्रामि मेषादीनामुदय: लिख्यंते ॥
मे २३१ वृ २६२ मि ३०७ क ३३० सिं ३३६ क ३२५ तु ३२५ वृ ३३६ ध ३३१
म ३०७ कुंभ २६२ मी २३१ लंकोदयमेष: २७८ मी ॥ वृ २९९ कुं ॥ मि
३२३ म ॥ क ३२३ ध तु ॥ सिं २२९ वृ ॥ कं २७८ तु ॥ अथ तात्कालि-
अयनभागयुक्त इस्यादीनां जातं तात्कालिकं लग्नं ८।२२।४८।१३
इदं षड्भयुतं निशिशेषा हर्ध्वं जातं लग्नं २।२२।४८।१३ अथ नतोद-
हरणं ॥ तत्र नतं चतुर्धा भवति दिवापूर्वं १ दिवापश्चिमं २ रात्रिपू-
र्वं ३ रात्रिपश्चिमं ४ चेति तत्र रात्रिपूर्वनतार्थं कल्पितं रात्रिशेषं २
दिनदलेयुक्तं १४।२४ तेरात्रिपूर्वनतं १६।२४। अथ दिवापूर्वनता-
लग्नं मिवलग्नं तत्र माध्यं दशमं स्यात् ॥ षड्भं सुखं स्यात्
नं [illegible] साध्यं तन्माध्यं दशमं षड्राशियुक्तं दशमं सुखं स्यात् ॥ च परि. [illegible]

ष:

अस्माद्व्यादयस्तात्कालिकस्पष्टलिख्यंते ॥

ग्रह	र०	चं०	मं०	बु०	गु०	शु०	श०	रा०	के०	
स्पष्टग्रहाः	६ ५ ३८ ४	१० १४ २३ १२	७ १९ ७ १८	११ १८ ४४ २६	३ २७ ५३ १३	५ २० ५४ १३	० २८ ५३ ५२	५ ५ २ २०	११ १० २ ३	स्पष्टग्र गतिः स्पष्ट
गतयः	५९ ५३	७३२ २९	४६ १४	३५ ५६ मा	७ २६	७४ ८	[illegible]	३ ११	३ ११	

शे:	म	बु	गु	शु	श
शीघ्रकेन्द्राणि	९ ४६ ९	७ २९ ५४ ३३	३ २९ ५२ ५२	१० २३ २९ ३८	१० ५१ ३१
गतयः	२२ ६	१८६ १४	५८ २३	३७ ०	५६ ५२

शे:	म	बु	गु	शु	श
मंदफलानि	७ ३१ २६	२ १४ ४१	५ २२ ४६	१ ३० ०	३ ४५ २०
	ऋ	ध	ध	ऋ	ऋ
शीघ्रफलानि	२९ ५० २५	२१ ६३	१० ५५	२५ ४८ ५२	१३ २३
	ऋ	ऋ	ध	ऋ	ध

॥ लंकोदयः ।

मे	२७८	मी
वृ	२९९	कुं
मि	३२३	म
क	३२३	ध
सिं	२९९	वृ
क्या	२७८	तु

स्वोदयः

मे०	२३१	मि:
वृ०	२६३	कुं:
मि०	३०७	मं:
क०	३४१	ध:
सिं०	३३६	वृ:
क०	३२५	तु

कें ७

उ०

मं स्यात् ॥ सूर्योन्नतेसंति ॥ षड्भाशियुक्तः सूर्योऽतं इष्टकाले प्रकल्प्य

लंकोदयकैर्लग्नं साध्यं ॥ तन्माध्यं दशमं ॥ षड्भाशियुक्तं दशमं सा

तं ॥ च परं पश्चिमनते सति आदिसः सूर्यार्कवृत्तात् ॥ लंकोदये

र्लग्नं साध्यं दशमं स्यात् ॥ षड्भाशिसहितं चतुर्थं ॥ एवं भावचतुष्ट

यं साध्यं ॥ अथोदाहरणं दशमभावसाधनार्थं पूर्वोन्नतेतात्का

लिकोर्कः ॥ ६।५।३९।४९ षड्भाशियुक्तं ०।५।३९।४९ अस्माल्लंको

दयैर्नतात्कालिकोऽर्कः इत्यादिना जातं दशमं ६।४।३५।१७ इदं षड्भा

शियुक्तं चतुर्थं ॥ ०।४।३५।१७ षड्भाशियोगं विना दशमसाधनमुक्तं

स्मात्लघुगिपद्धतौ पूर्वोन्नतात् परनतात् स्फुटसाधनाल्लंकोदयैः

कथितवत्तनुरेवकार्या ॥ तस्मात् सुखं दशमभावसाधनात्व्यमेव तु

सुखं

राम ७

त

र्थं जन्मसमय तत्र उदयात् दिनगतं १४।५।४ दिनदलेन १४।२४ रहि
तं जातं दिवापूर्वनतं ०।१०। अथवा पश्चिमनतार्थं कल्पितमन्हःशेषं ४
दिनदले १४।२४ विश्लेषितं जातं दिवापश्चिमनतं १०।२४ अन्हःशे
षं नाम दिनमानं २८।४८ जन्मकालिकस्फुटाच्छः २४।४८ हीनं जातं अन्हःशे
षं ४।० दिनदले १४।२४ विश्लेषं दिवापश्चिमनतं स्यात् १०।२४ रात्रौ
पश्चिमनतार्थं कल्पितं निशिथाद् ऊर्ध्वं गतकालः १०।१० दिनद
लेन १४।२४ युक्तं जातं २४।२४ रात्रौ पश्चिमनतं स्यात् ॥ इदं
नतचतुष्टयं त्रिंशत् ३० च्युतं जातं क्रमेणोन्नतचतुष्टयं ॥ रात्रौ
पूर्वोन्नतं १९।३६ रात्रौ पश्चिमोन्नतं ५।३६ दिवा॰ पूर्वोन्नतं
२९।५० दिवापश्चिमोन्नतं १९।३६। दिवापूर्वनतार्थं २९।५० तात्का
लिकोर्क इत्यादिना लग्नं साध्यं ॥ लंकोदयकैः लग्नमिव लग्नं दश

र्वं

न्हे मध्यरात्रेवा ॥ तु दानत कालभावोत्कालिनः स्वर्य एव दशमभा
वो भवतीति ॥ एवं भाव चतुष्ट्ये सिद्धे ऽन्य भावसाधनं संधिसाध
नमारोहावरोहौ ग्रहभावफलसाधनं चाह ॥ ॥ त्र्यंशोव्यस्त७ख
भस्य१० भूयमहृतोयोऽन्यस्तनौद्विच्युतोवंधोतेपिच सागभास्तनु
मुखाः संधिर्द्वियोगार्द्धितः ॥ अन्य संधिषु भावगेखिल फलं स्या
द्भावसंध्यंतरेणासंसंधि खगांतरक्षय चयभावाधिके फलं ख
गे ॥ २ ॥ ॥ त्र्यंशेति ॥ व्यस्तखभस्य त्र्यंशः भूयमहृतः तनौ योऽन्यः
विगतेअस्तं व्यस्तं सप्तमभं ॥ व्यस्तं च ततखमं च खं नाम दशमं
भं ॥ सप्तमरहितदशमस्य त्र्यंशो राश्यादिग्राह्यः ॥ स द्विधा ए
कत्र भूहृतोऽपरत्र द्विहृतः तनौ लग्ने योऽन्यः क्रमेण द्वितीयतृ
तीयभावौ भवतः ॥ स राश्यादि त्र्यंशो द्विच्युतो द्विधा । भूयमहृ

राम

भाद्रीघ्नेतंदशमं चुग्रहक्रमेण ॥ नतंविनापिदशमभावसाधनमु
क्तं ॥ विवाहवृंदावने ॥ क्षत्वालग्नादर्कं यदात्रिखं भयोव्यक्षैर्लद
टीभिश्चलग्नंचक्राद्धीनितेचतात्कावर्षएवंजयेयातोमृत्तमध्या
ल्लग्नेइति ॥ अस्यकलितार्थः स्वेष्टकालेप्रथमंलग्नंस्फुटसात तो
तोलग्नमेवरविंप्रकल्प्यतस्मात्स्वरंचानियं ॥ रात्रिदलकार्यं ॥
अथरात्रिदलमिष्टकालंचप्रकल्प्यलग्नंतात्कालिकार्कप्र
कल्प्यता त्कालिकोर्कइत्यादिनालंकोदयैर्लग्नंसाध्यं ॥ तच्चतु
र्थंभवति ॥ अथलग्ने चतुर्थलग्नेचराशिषट्कंयोजनक्रमेण
सप्तमलग्नंदशमलग्नंभवति ॥ अत्रेदंबोध्यं ॥ सूर्योदये ॥
सूर्यास्तेवायदिजन्मभवति ॥ तदादिनगतरात्रिगतोभा घा
वादिनार्द्धतुल्यमेवनतं ॥ तस्माच्चैतत्रनतसाधनंयदिमाध्या

केश.
१०

उदा.

१४।५२।४६ अर्द्धितो ११।१७।३१।२६।२० जातासुहृद्सहजभावयोः
संधिः॥ अथ भावानां भागसाम्यं केषु केषु च परमांतरमंतरा भा
व श्रेयसे तदुक्तं लालुगिनदुक्तौ॥ धीधर्मभ्रातृखाङ्गेषु धनासनि
भागेषु धनारिषु समभागाः स्युः खाम्बुनोर्लग्नजाययोः॥ कर्कटादौ
मृगादौ च भावानां परमांतरं॥ तुलादौ नैवमेषादौ वितिहारा
भ विदो विदुरिति॥ अथ प्रथमं भावचतुष्टये संधित्रये च सिद्धे
ऽन्यभावसंधिज्ञानार्थं उपायः॥ भावा राममिताः स्वसं
वा धिसहिताः साध्या यथोक्त्या अथ भवौ रामयमोन्मितौ द्वाभ्यां
चतुर्भिः क्रमात्क्रमात्॥ तौ बाणांगमितौ तथा क्रमं ३ यमरक्षमाः
संमिताः संधयो। षट् १ रामेषुयुताश्चुगेंद्रियरसैस्तैस्युरन्ये राम
ल्याः
५

तो बंधो चतुर्थभावे यो ऽयः क्रमेण पंचमषष्ठमभावौ भवतः॥
एवं लग्नादिषड्भावाः जातास्ते षट्राशिषट्कयुक्ताः ऽयादयः
षट् भवंति॥ ते पि च तनुमुखाः सागराः [redacted] द्वादशभावाः
भवंति॥ एवं द्वादशभावाः जाताः॥ अस्योदाहरणं॥ अस्तं २।२२
।५।१३ खभंद्य ८।३५।१७ व्ययस्खभं ३।११।७।४ अस्य त्रिंशो
राश्यादिः १।३।५५।७१।२० अयं द्विधा एकत्र भ १ हतः १।३।५५
।१।२०। लग्नेन २२।४८।१३ योजितो जातो धनभावः २।२६।४३
।५४।२० अपरत्र यम २ हतः २।७।५१।२२।४०। लग्ने योजितो जा
तो तृतीयो भावः १९।१०।३२।३५।४० सप्तमं शोद्धि च्युतः ०।२६।४
९८।४०। भ १ हतो बंधो ०।४३५।१७ यो जितो जातः पंचमभा
वः ११०।३२।३५।४० हि हतो १।२२।४८।३१।२० बंधो यो

केश. ८

ऊ

जितो जातः षष्ठभावः १।२६।४३।५४।२० एते षड्राशियुक्ताः जाताः
द्वादश भावाः ॥ संधिज्ञानार्थमाह ॥ ॥ संधिरिति ॥ द्वयोर्भावयोर्यो-
गार्द्धं संधिः स्यात् ॥ तथा ॥ द्वादशलग्नयोर्योगार्द्धं द्वादशस्योत्तरसं-
धिर्लग्नस्यादिसंधिश्च ॥ एवं लग्नद्वितीययोर्योगार्द्धं लग्नस्योत्त-
रसंधिर्धनभावस्यादिसंधिश्च ॥ एवं सर्वेषां द्वादशसंधयः स्यु-
रित्यर्थः ॥ अत्रोदाहरणं ॥ ॥ व्ययभावः ७।२६।४३।५४।२० ल-
ग्नं ८।२२।४८।१३। अनयोर्द्वयोर्योगः १६।१९।३२।७।२० अ-
र्द्धितः ८।९।४६।३।४०। जातो व्ययलग्नयोः संधिः ॥ एवं लग्नं ८।
२२।४८।१३ धनभावः ९।२६।४३।५४।२० अनयोर्योगः १८
१९।३२।७।२०। अर्द्धितो ९।९।४६।३।४०। जातो लग्नधनयोः
संधिः ॥ एवं जाताः सर्वे संधयो भावा एकत्र लिख्यते ॥ ॥ ८

पं

ल	त	ध	स	सु	पु	रि	जा	म	ध	क	आ	व्य
भावाः	८ २२ ४८ १३	९ २६ ४३ ५४ २०	११ ० ३१ ५ ४०	० ४ ३५ १७ ०	१ ० ३१ ५ ४०	१ २६ ४३ ५४ २०	२ २२ ४८ १३ ०	३ २६ ४३ ५४ २०	५ ० ३१ ५ ४०	६ ४ ३५ १७ ०	७ ० ३१ ५ ४०	७ २६ ४३ ५४ २०
रा	स	स	स	स	स	स	स	स	स	स	स	स
संधयः	८ ९ ४६ ३ ४०	१० १३ ४१ ५५ ०	११ १७ ३७ २६ २०	० १७ ३७ २६ २०	१ १३ ४१ ५५ ०	२ ९ ४६ ३ ४०	३ ९ ४६ ३ ४०	४ १३ ४१ ५५ ०	५ १७ ३७ २६ २०	६ १७ ३७ २६ २०	७ १३ ४१ ५५ ०	८ ९ ४६ ३ ४०

अत्रेदं बोध्यं ॥
भावद्वययो-
गकरणे च
अधिकृत-
या चक्रेण
साध्यं ॥ य-
स्मिन् भा-
वे अन्येन त- राशि
स्य भावस्य स्थाने
पूर्वभावेन सह संधिकरणे श्र्न्यस्थाने द्वादश ग्राह्याः ॥ उत्तरभावे-
न सह संधिकरणे तु श्र्न्यमेवेति ॥ यथात्र सुहृद्भावः ०।४।३५।१७
अस्य पूर्वः सहजभावः ११।०।३१।३५।४०। अनयोर्योगः २२।५

के.
११

फलेः रात्र्यर्धं १८।३४।२२।७। चलनयुक्तनोऽसमपदस्थलाग्नं
जातमंदवागि १६।५०।३३।११। एतेनैरंशैर्फलात्तनु जातालग्नधन
योः संधिः ।०।१८।३८।४६।११। अस्मिन् पुनस्ते अंशयो जितो
धनभावः ०।२६।२०।१०।२६ अस्मिन् पुनर्योजिता: जातो ध
नसहजयोः संधिः १०।१३।१०।५२।२०। पुनरस्मिन् यो जिनः स
हजभावः ११।०।१०।२५।५२। पुनरस्मिन् यो जिता: सहजसुह
दोः संधिः ११।१७।०।५०।१४ अस्मिन् पुनर्योजिताज्जातस्व
तुर्थः १०।३।५१।३२।१८। अथ रामप्रशूआंशा ११।०।२६।४७।
श्चतुर्थोयो जितोजातः सुहृत्सुतयोः संधिः १०।३।०।५०।५ राम
अस्मिन् पुनर्योजिता: जातः पंचमभावः ११।०।१०।२५।५२ ११
अस्मिन् पुनर्योजिताज्जातः पंचमषष्ठयोः संधिः ११।१३।१०।५२।०।०
पुनरस्मिन्योजिता: जातो रिपुभावः १२।२६।२०।१०।२६.

पुनरस्मिन् योजितः जातः षष्ठसप्तमयोः संधिः २०।३८।४६।१३।७
तेषड्भान्विताःस्तनुमुखाः ससंधयो द्वादशभावाः॥ जातकमुक्तावल्यां
प्रकारांतरभावसाधनमुक्तं॥ वि लग्नाद्करात्रि च संसाध्य भा
धेखरामैः फलेऽस्वस्वसंसेविलग्ने॥ गृहीत्वा गृहीत्वा क्रमात्कार
येच्चौ स्ववित्तक्रमाद्भावसिद्धिः स्फुटा वा लघुः स्यात् इति॥ अथ ल
ग्नचतुर्थयोः सिद्धो युगपद्देवसस्संधिसर्वभावसाधनार्थं सूक्ष्मादे
वत्तगुरुचरणोक्ताः श्लोकाः लिख्यते॥ लग्नं चतुर्थात्संशोध्य शेषष
ष्ठं तेनोक्षिपेत्॥ सलग्नधनयोः संधिः संधौ षष्ठं पुनः क्षिपेत्॥ १
स भवेद्धनभावोत्र तत्षडंशं पुनः क्षिपेत्॥ स भवेदग्रिमः संधिरे
वं यावच्चतुर्थकं॥ रूपात्संशोध्य षष्ठांशं निक्षिपेत्तं चतुर्थके॥ २
त्क्रमेण तु भावाः स्युर्जाताः संधयः॥ तदा तेऽपि षड्भाव्याः॥

स

॥५॥
के० खे सत्समाघा भावंतिहि ॥ एवं लग्नपदे वात्र भावाः सर्वे ससंध्ययइति ॥
१२ अस्योदाहरणं ॥ स्पष्टलग्नं ( ) स्फुटं भावगे ॥ भावांशतुल्ये ॥ अरवि
लंसंपूर्णं फलंस्यात् ॥ अत्र संपूर्णलघोतक प्राचीनैः रूपमेव
कल्पितं । तथा चेदं सिद्धं ग्रहस्य संधिनाय थाय थाधिकमंतरंतथा
तथा फलमप्यधिकं भवति ॥ अतो ग्रहसंध्यंतरेण फलं साध्यं ॥
तत्र भावतुल्ये ग्रहे यावद्भावसंध्यंतरं तावदेव ग्रहसंध्यंतरमपि भ
वति ॥ तत्र फलमपि पूर्णं भवति ॥ तथा च भावसंध्यंतरतुल्ये ग्रहे
यावत् भावसंध्यंतरं तावदेव ग्रहसंध्यंतरमपि भवति ॥ तत्र
फलमपि पूर्णं भवति ॥ तथा च भावसंध्यंतरतुल्ये ग्रहसंध्यंत
रे यदि रूपं फलं तदा इष्टे ग्रहसंध्यंतरे किमित्यनुपातेन मध्ये फ
लं साध्यं तमनुपातमाह स्यादिति ॥ अयमर्थः ॥ भावान्युने राम
१२

तवइति ॥ अथ लग्ने सिद्धे ससंधि खर्वाभावसाधनार्थं किंचित्सांतरोक्त
७ नृसिंहदेवसोक्तो हिल्लाजदीपिकास्थः प्रकारो लिख्यते ॥ लग्नं स्फुटं
चलनयुक्तं तो भजांकाः खषट्युगानि खयुगानि पुनः अमेषा
त् ॥ भागादिकान् क्षयचयेन हतो खरामैर्लब्धेन हिनसहितः क्रम
शः पलेस्तैः राश्यादिकं चलनयुक्तं तु तः पदे अयुक्तं समे च विषमे वि
युक्तं तदंशैः ॥ युक्ता तनुश्च पुनरासकरवम भंरामाश्च धेयुतं हिबुकमारि
पुसंधितस्ते ॥ षड्भान्वितास्तनुमुखा निजसंधियुक्ता भावाः क्रमाद्ध
गपभवंतिसंधयस्ता इति चलनं ॥ अयनांशाः भजांकाः राश्याद्यंकाः
॥ शेषं स्पष्टं ॥ अस्योदाहरणं ॥ चलनं ७।१५ युक्तनुः २।१०।२३।१३
अतो भजांकः । चयेन ४६ भागादिकाः ॥१०।२३।१३ गुणिताः ४८५।
३।१८ खरामैर्लब्धं २६।१०।५६ चयस्य सत्वादनेन युक्तो भजांकः एतेः

केसू·
१४

एते सवर्णिता जाता भावत्य ...द२।४० भावसंध्यंतरेण १७।२१।९ सवर्णितेन ४६।९।२९ भक्ते भा... लब्धं विंशोपकादि ८।८।२४।१२ विभावे
मूलं घ्यसंधियाति अतः इदं अवरोहफलं यदा तु संधिमुल्लंघ्य
भावं याति तदाऽरोहफलं ज्ञेयं ॥ ए...तानि सर्वेषां विंशोपकादी
नि भावफलानि लिख्यते ॥ ॥ अथ रूपादिविंशोपकादि भाव

र	चं	मं	बु	गु	शु	श	रा	ग्रह भा
१९ २२	० ५७	१९ २०	१ ११	१८ ३१	३ ५४	१७ १८	८ ५६	वविंशो पक...
क्ष	क्ष	क्ष	च	क्ष	च	च	क्ष	निबल

जं वियुत्यातं विंशोपाको
दिकं विंशोपाकादिकं व
द्विघ्नं रूपादिकं भवेदिति नि
अथ दृष्ट्यानयनमाह ॥
वैकाग्नि द्विखवेदरामा यमुभूरवाभाभा मेकादिभे द्रष्टा वर्जितहस्य
...कस्य गुरुणा चे... दृष्ट्वेदहता: ॥ मंदेनाकयमे स्व जानग
गुणेहरिद्धकवासंस्कृता भाग ... क्षयवदि खानलत्वेनाढ्य राम
१४

गृहे पूर्वसंधेरारभ्य भावांशावधि उपचयात्मकं फलं तत्साधने यह स्य पू
र्वसंधिना सहांतरं कार्यं ॥ भावाधिके ग्रहे आपचयात्मके तत्साध
ने च उत्तरसंधिना सहांतरं कार्यमिति ॥ तदेवो...क्तं दामोदरपद्धतौ ॥
भावोनकः खगः पूर्वसंधिना रहितस्तदा ॥ अधिकश्चेद्द्विरामा
ख्यसंधेः शोध्यस्तदंतरं ॥ भावसंध्यंतरेणाप्तं तद्भावफलमुच्यते ॥
तदारोहः पूर्वसंधेरवरोहं तथांतिमादिति ॥ अथ जन्मकुंडलीभाव
वे कुंडलीं लिख्यते ॥ ॥ अथ भावस्पष्टग्रहज्ञानार्थमुपायः ॥ तद्भव
...जं फलं धनं यसंधिद्वय
...ग्रहः ॥ भावाल्यः पूर्व
भावोद्दम्मधिको...
स्वरो...वमिति ॥ अ
स्योदाहरणं ॥ रा ...

ने.ना. र्कः ६।५।३९।४ रविनिकटसंधिः ६।१७।३७।२६ अनयोरंतरं भागादि ११। उदा.
१२ ५८।२२। सवर्णितं जातो भाज्यः ४३१०२। रविनिकटभावसंध्यं ६।४।३५
१७ तरं १३।२१९ सवर्णितं जातो हारः ४६९२९ हारेण भाज्ये भक्ते लब्धं
रूपादि रविभावफलं ०।५५।६ ग्रहस्य भावाधिकत्वादवरोहं॥ एवं
जातानि रूपादीनि सर्वेषां भावफलानि लिख्यते॥ एवं फलार्थमिष्ट

र	च	मं	बु	गु	शु	श	रा	के	ग्रहाः
१०	४	१२	१०	८	१०	५	५	३	१।२।३
०।५५।६	०।५४।५१	०।४८।५८	०।३।५६	०।५५।५८	०।११।४३	०।५१।५३	०।२६।४१	०।२६।४१	अंशादि
क्ष	क्ष	क्ष	[illegible]	क्ष	[illegible]	[illegible]	क्ष	क्ष	फलानि

मनुपातः यदि भावसंध्यंतरे विंशतिफलं तदेष्टे किमिति जातं भावफलं॥ उक्तं च तं
दामोदरपद्धतौ चरोधिकोनोये रश्मिके स्तान्करजैर्निहन्यात्।
भावेप्यगतांतरायेभागहरे तेश्च अन्यत्रापि॥ संधेरूनाधिका
जा भागा भावसंध्यंतरेणासा फलं भावविशोपकाः इति॥
१२

अथ विंशोपकात्मकभावफलानामुदाहरणं॥ राश्याद्योऽर्कः ६।५।३९।४। नि
कटसंधिः ६।१७।३७।२६ रविनिकटभावः ६।४।३५।१७ संधिखगांतरभा
गाः विंशोपकात्मकभावफलार्थमिष्टमनुपातः यदि भावसंध्यंतरतु
ल्ये ग्रहे संध्यंतरे विंशतिफलं तदेष्टे किमिति जातं विंशोपकात्मकं भाव
फलं॥ उक्तं च॥ दामोदरपद्धतौ॥ संधेः सकाशात्खचरोधिकोनोयेर
शकैस्तान्करजैर्निहन्यात्॥ तत्संधिभावेप्यगसंतरायेभागाहरे ते
श्च विंशोपकाः स्युः॥ अन्यत्रापि संधेरूनाधिका भागा ग्रहस्य
नखताडिताः॥ भावसंध्यंतरेणाप्तं फलं भावविशोपकाः इति॥
अथ विंशोपकात्मकभावफलानामुदाहरणं॥ राश्याद्योऽर्कः ६।५।३९।
४ निकटसंधिः ६।१७।३७।२६। रविनिकटभावः॥ ६।४।३५।१७
संधिखगांतरभागाः ११।५८।२२। नखताडिताः २३९।२७।२०

के॰ उ॰ भेदृशः ॥ भागार्द्धं तिथियुग्भागा भागार्द्धोन शराख्यपः ॥ १ ॥ भे ऽंशयोशादि
९६ गुणा शाश्च तथा षष्ठिरादिकः समाप्त ॥ षष्ठिः शराब्धय त्रिंशत् तिथयोशद
लोनिताः एकभे नवमे चार्कि भुक्तभोग्यमहिसंगुणाः ॥ द्विभेशार्द्धोनिता
षष्ठि रष्टमे खाग्नियुग्लवाः ॥ ३ ॥ त्रिसप्तभेतु भौमस्य षष्ठिरत्र लवोनि
निताः ॥ सार्धांशास्तिथिसंयुक्ताद्विभे रूपसद्गंगभे ॥ ४ ॥ त्रिसप्तभेतु
जीवस्य भागार्द्धं शरवेदयुक् ॥ द्विगुणैः सदलैश्योनाः खरसाश्चतुर
ष्टभे ॥ ५ ॥ इत्युक्ता [illegible] स्तर्यादयो दृश्याः ग्रहदृक्चक्रं ॥ ॥ तन्वादयो दृश्याः

श्री	र	चं	मं	बु	गु	शु	श	भाव	त	ध	स	सु	लु	ति	ज्ञा	म	ध	कं	अ	यु
र	० : ०	० ५५ ३७	० ११ ४८	० ० ०	० ५३	:	० ८ २२	५४ र वि	० २२ २	३४ २७	० ५१	५७ ५२	० ०७ २१	३ २१	२ २५	१ २३	:	:	:	१० २२
चं	० २ ६०	:	३७ ३८	० ८ ४१	३८ २५	० १३ ५	:	चं	२५ ४३	० ८ ५०	० ०	० ०	० ०	६ १२	२३ २५	३ ४	० १ ४	० ४ ३	० ५ ५२	३८ ५०

५२ ५२ ९६

धृतादृग्गम्य वेत् ॥ ४ ॥ ॥ स्वैकेति ॥ अस्यार्थः ॥ यो ग्रहः पश्यति स द्रष्टा ॰ तेन ९
द्रष्टा यदुपरि दृष्टिरानीयते स दृश्यः ॥ दृश्य एव दृश्यकः ॥ स्वार्थे कन् ॰ वर्जितश्चा
सौ दृश्यश्च स्वैकवर्जितदृश्यकः ॥ दृश्यमध्ये द्रष्टाशोध्य इत्यर्थः ॥ तस्य एकादि
भे ॰ एकभमारभ्य द्वादशपर्यंतं भे राशौ शेषे सति ॰ आदिजाः रा श्यादिजाः दे
न काद्यांकाः पथात्क्रमात्स्युः ॥ तद्यथा ॰ एकभे खमंकः ॥ द्विभे एकर्त्वादि ॰ खा
ग्न्याभ्रमि सत्त्रसमहारद्वंद्वः ॥ चेत् ॥ यदि गुरुणा द्रष्टावर्जितदृश्यकस्य अष्ट
वेदराशौ शेषे सति तथा मंदेन शनिना द्रष्टावर्जितदृश्यकस्य अंकयमे ॥
ति नवर्क्षे द्विभे शेषे सति तथा ॰ असृजा ॰ भौमेन द्रष्टावर्जितदृश्यकस्य ॰ नगेंगे गु
ससभे त्रिभे शेषे सति दृष्टा स्वाचारांकाः स्थाप्याः नस्वैक्ताः अंतरम
पि चतुर्भि रेवकार्यं ॥ नस्वेचांके शस्य धष्ठित भागादिभि र्ग्रहं गु

के० १५ णिताया क्षयवृद्धिः प्राग्राश्यादिजाग्रिमांकयोरंतरं ॥ पंक्षेच वृद्धि
श्च क्षयवृद्धी ॥ भागाभ्यासो विघ्नाश्च भागनिघ्नाः क्षयवृद्धिभ्यां भा
गघ्नाः ॥ भागघ्नक्षयवृद्धिः भागघ्नक्षयवृद्धेः खानललवं भागः ॥ भाग
घ्नक्षयवृद्धिः खानललवेन भादिजांकाः राशौ द्विजांकसंस्कृताः ॥
अग्रिमेन्युने क्षयः ॥ अधिके वृद्धिः तस्याः खानललवेन त्रिंशद्देशोन
वीकाः भादिजांकाः संस्कृताः कार्याः ॥ नक्षत्राः क्षये हीनाः वृद्धावा
धिकाः ततश्चतुर्भिर्भक्ताः फलं रूपाद्याः दृष्टिर्ग्रहेषु परस्परं ॥
भावेषु च भवति ॥ अस्योदाहरणं ॥ द्रष्टा रविः ६।५।३९।४।२ द्रश्यश्चंद्रः
०।१४।२३।४२ द्रष्टावर्जितः ६।८।४४।३९ अत्र राशिषड्कमुक्तिः तत्र
भादिजांकोवेदाः ४ अग्रे रामाः ३ अनयोरंतरं १ क्षयः भागे ८।४४
३९ गुणिताः ८।४४।३९ अस्य खानललवः ०।१७।२९ क्षयस्यास्य

स्वादनेन भादिजांको हीनः ॥ ३।४२।३१ अभ्युद्धृतः फलं ०।५५।३७ जाता
रूपाद्या दृष्टिश्चंद्रे कस्य ॥ अथ विशेषदृष्टिउदाहरणं ॥ द्रष्टा गुरुः ३।२७
५२।१३ द्रश्यश्चंद्रः ०।१४।२३।४२ द्रष्टावर्जितः ९।१६।३१।२९ गुरुर्दृष्टा
स्ति ॥ अतो गुरुणा चेद्दृष्टव्यं द्वे सतो … भादिजांकाश्चत्वारः ४
अग्रे एकः १ अनयोरंतरं क्षयः ३ भागे ९।१६।३१।२९ गुणिताः ४९।
३४।२७ अस्य खानललवेन १।३९।८ क्षयस्य विद्यमानत्वादनेन
भादिजांको रहितः २।२०।५२ अभ्युद्धृतो लब्धं जाता रूपाद्या
गुरुदृष्टिश्चंद्रे ०।३५।१३ एवं शनिभौमयोरपि विशेषदृष्टयः साध्याः
एवं जाताः सर्वेषां ग्रहाणां परस्परं ॥ भावेषु च दृष्टयो रूपाद्यालि
ख्यंते तत्र चादर्योदृश्यः ॥ अथ सुगमोपायेन दृष्टयनयनार्थं गुरुच
रणोक्ताः श्लोकाः लिख्यंते ॥ द्रष्टावर्जितदृश्यस्य क्रमादंकोदि

अथ रविउच्चं ॥ रविः ०।१५।३९।४१ रविनीचं ६।०।०।० नीचोनोर्कः ११।२५।३९।४
केरा: कुलीरासषवनिजोच्चदिवाकरादितुंगाः ॥ दशशिखिमनुयुक्तिथी
२८ द्रियांशेस्त्रिनवकविंशतिभिश्च्यतेस्तनीचाः ॥ उच्चाः ॥ परमोच्चाः ॥
अन्यथास्वंस्वर्णराशेरेवोच्चचेनदशादेयर्ग्रहोमानर्थक्यप्रसंगात् ॥
अत्र तद्राशयः षष्टि ६० गुण्याः आधो भागादिद्वि २ गुणितः सषष्ट्या
२१५ स्वबमुदियुक्तं ०।८।१५।२। षष्टिगुणिते संयोज्यं षड्भक्तं उच्च
बलं रवेस्यात् ०।१।२७। अथ चंद्रउच्चबलं ॥ चंद्रः ०।१४।२३।४२ नी
चं ७।३।०।०। [redacted]
नीचोनश्चंद्रः ५।११।२३।४२। राशिस्थानेषड्भक्तं फलं ० शेषं ५।११।२३
४२ राशिस्थानेषष्टि ६० गुणितं भागादिद्विगुणितं षष्ट्यामुपरि[illegible]
द्वि

म	. . .	० १४ ४२	० १० ०	० ५ ११	० ३१ ३५	० ४ ५	० ० १३	म	० १३ २८	० ५८ २९	० २४ ३२	० ३ ४	० ५५ १३	. . .	. ३२ २३	० १४ १४	० . .	. . .	. . .	. . .
बु	. . .	० ४८ १०	० २५ २२	. . .	. . .	० . .	० ३१ ५५	बु	० ४२ ५८	० २२ ०	० ३६ ५०	० ५२ ४	० ३१ २	० २६ ०	० १२ ५८	. . .	. . .	. . .	० ५ ५	० २२ ५८
गु	० २२ ४१	० ३५ १३	० ५७ ३०	० १० २६	. . .	११ ३२	० २४ २१	गु	० १० ८	० ५७ ४३	० ४६ २३	० ३९ ५५	० ५१ ३६	० . ३४	. . .	. . .	० १ २३	० २१ २३	० ४५ २३	० ५१ २५
शु	. . .	० ४८ १६	० २३ १३	. . .	. . .	. . .	० ४१ १	शु	० ४४ ४२	० २१ १२	० ११ २६	० ५३ १३	० ४० ८	० २६ ६	० १४ ८	० . .	. . .	. . .	० ५ ५१	० २० ५०
श	० १३ ३०	. .	० ४४ ५३	० १ ०	० ४५ ३१	० ७ ५१	. .	श	० ३३ ३	० ५७ ५०	. . .	. . .	. . .	. . .	० ७ १८	० ४२ ५	० २८ ५१	० ११ २३	० ५१ ३	० ४६ ५

[illegible]यं ॥ भावे पुत्रहाणां दस्त्यः स्फुटाः ॥ षष्ट्यासरस्त
पपूर्वाः स्युः फलदाः सदशास्विमाः २६ ॥ इदं पद्यं लघुगीलघु
[illegible] जातके पद्मसुदाहारणे द्विगणितोदाहारणं ॥ ॥ अथव

केऽदृ॰ ७१ लग्नाणि नोदाहरणं॥ तत्र बलं षड्विधं॥ स्थानं १ दिक् २ काल ३ निसर्ग ४ उद॰
चेष्टा ५ दृग्भेदात् ६॥ तत्र स्थानबलं पंचधा॥ उच्चांशसप्तवर्गजं ओजांशजं॥ ३
दृक्काण कंटकादिभांतर्मध्यस्थखभेदात् ४ ५॥ दिग्बलमेकप्रकारं॥ कालबलं
चतुर्द्धा दिनरात्रिबलं १ पक्षबलं २ दिनरात्रिभागेषु बलं ३ स्ववर्
षमासदिनहोराबलं चेति॥ ४ निसर्गमेकधा १ चेष्टाबलं द्विधा २
अयनबलं १ चेष्टाकेंद्रोत्थं च २ दृग्बलमेकप्रकारं १ एवं पंचद
शधा ग्रहबलं॥ तत्रादौ स्थानबलभेदेषूच्चबलं सप्तवर्गजं बलं
चाह॥ ॥नीचोनो भगणाच्च्युतः षडधिकश्चेत् षट्‌हृदोच्चं बलं
स्वक्षे हं ३० समभेष्टमं स्याच्चरणा १५ मूलत्रिकोणे बलं॥ मि
मित्रक्षे द्वि ४५ रधीष्टभे त्रयः भांशा २२ वैरिभेषु ... ३७ ७

२२ तांशो ध्यरिभेगृहाधिपवशात् खेटस्य सप्तैक्यजं॥ ५॥ नीचोन
इति॥ अस्यार्थः॥ नीचेन तु नोरहितो ग्रहो यदि षडधिक राश्या
त धिकस्तर्हि भगणात्॥ द्वादशराशिभ्यश्च्युतः शोध्यः षड्राश्यल्पश्चेत्त
तः यथास्थित एव स्यादिति सिद्धं॥ सशोधितराश्यादिकः षट्‌हृतः षड्भक्तः
फलं रूपाद्यमोच्चमुच्चसंबंधिबलं स्यादित्यर्थः भजनप्रकारश्च यदा
नीचोनग्रहस्य संख्याः षड्राशयस्तिष्ठंति तदा षड्भिर्भागे संख्यं रू
पं बलं भवति यदा षड्भ्योऽल्पास्तदा षड्भिर्भागे रूपस्थाने शून्यं ग्राह्यं तद्र
शयः षष्ट्या गुण्याः अधोभागाद्यं द्विगुणीकृत्याधः षष्ट्यालब्धमुप
र्युपरि युक्त्वा सत्वा षड्गुणिते संयोज्य उपरि पुनः षड्भक्तं कार्यं
तदुच्चबलं स्यात्॥ दिग्बलादावप्यमेव भजनप्रकारः॥ तत्र ग्रह
णामुच्चनीचानि बृहज्जातके उक्तानि॥ अजवृषभमृगांगना

के.बा. १९ गात् १२ शोधित: ०४।२७।५६ षष्ठ्याप्तो जातमुच्चबलं रूपाद्यं स्य ०।१।२७ एवं जातानि रव्यादीनामुच्चबलानि रूपादीनी लिख्यंते ॥ अथोच्चब उदा. के.
लार्थं सुगमोपायो लिख्यंते ॥ नीचोनो द्युचर: षष्ठ्याधिक: स्वर्याद्विशोधित: १९

र	चं	मं	बु	गु	शु	श	उ
१०	[illegible]	[illegible]	५ १५	३ ५	११ [illegible]	६ २०	उच्चानि
६ १०	७ ३	३ २८	११ १५	६ ५	५ २७	० २०	नीच

भागादिद्विगुणो द्विघ्नो बलं स्यादुच्चसंभवं ॥ भालुगीपद्धतौ प्रकारांतरमुक्तं ॥ नीचखेटांतरं षष्ठ्या [illegible] कं चेदर्कात स्य[illegible]त् ॥

मे	वृष	मि	क	कन्य	मी	तु	उच्च
१०	३	२८	१५	५	२७	२०	
तु	वृ	क	मी	म	कं	मे	नीच

उच्च	र	चं	मं	बु	गु	शु	श
	०	०	०	०	०	०	०
मूल	१	५३	४०	५८	५२	२	२
	२७	४८	२२	४५	२२	१	५८
त्रिको	सि	वृ	मे	क	ध	तु	कुं
ण	२०	३	१२	१५	१०	१५	२०

तदृश्चीत्तलतमन्यात्समेतदुच्चबलं भवेदिति ॥ अथ सप्तवर्गजबलं ॥

राम १९

स्वर्क्षे हर्म्यमिति ॥ ॥ स्वर्क्षे ग्रहे स्वग्रहे अर्हं ०।३०।बलं स्यात् ॥ समभे सम
राशौ अष्टमांश: ०।७।३० मूलत्रिकोणे त्रिचरणा: । चरणत्रयं बलं
०।४५ मूलत्रिकोणानि बृहज्जातकेउक्तानि ॥ सिंहो वृष: प्रथमषष्ठहयांग म
तौलिकुंभास्त्रिकोणभवनानि भवंति सूर्यादिति ॥ स्वक्षेपि पंचमी ॥
सूर्यमारभ्येत्यर्थ: ॥ मित्रर्क्षे मित्रराशौ अंघ्रि: चरण: ०।१५।० अधी
ष्टभे अधिमित्रग्रहे त्रयष्टभांश: ०।२२।३०। वैरिभे शत्रुराशौ
अष्टमांश: षोडशांश: ०।३।४५। अर्धवैरिभे अधिशत्रुग्रहे दंतांश:
०।१।५२।३० आदीनी रूपायेति सर्वत्रार्यासिद्धं ग्रहाधिपवशात् ॥ ग्रहा
दिषट्[illegible]वर्गस्वामिवशात् सप्तवर्गाधिपे भोयथा स्थानोक्तानि स्व
क्षेर्द्धमिसादीनि सप्तवर्गाणां बलानि साध्यानि ॥ तेषामेवायं सप्तवर्ग

जबलं स्यात्॥ एतदुक्तं भवति॥ ग्रहस्वामी स्वर्क्षे चेद्रूपार्द्धं ग्रहबलं भवति॥
ग्रहस्वामी स[illegible]मे श्रेद्दशमांशः ०।७।३०। ग्रहबलं भवति। ग्रहस्वामी
मित्रं चेच्चरणः ०।१५।० अधिमित्रं चेत्त्र्यष्टांशः ०।२२।३०। ग्रह
स्वामिशत्रुश्चेत्षोडशांशः ०।३।४५। अधिशत्रुश्चेद्द[illegible]मांशः ०।१।५२
३०। ग्रहबलं भवति॥ एवं होरादिस्वामिवशा होरादिबलं तेषां॥ के
चित्तु॥ ग्रहोयस्मिन् ग्रहेस्ति तद्गृहेशः स्वमूलत्रिकोणे चेच्चरण
त्रयबलं॥ ग्रहेशः स्वर्क्षे चेद्दलं॥ ग्रहेशोधिमित्रभे चेत्त्र्यष्टांशः॥
एवमग्रेपि। एवं ग्रहोयस्यां होरायामस्ति तद्धोरेशः स्वमूलत्रिकोणे
चेच्चरणत्रयं बलं॥ होरेशः स्वगृहे चेद्दलमित्यादि॥ एवं द्रेष्काणादि
ष्वपीति॥ ग्रहाधि[illegible]र्थमोहुः॥ तत्र॥ तथा सति ग्रहादि

पवर्गादिस

राम
२०

खं यो ज्यं षष्टिगुणितेसं योज्यं ३।२२।४७।२८ पुनः॥ ष[illegible]भक्तं फलं रू
पादिचंद्रोच्चं भवति ०।५।३।४ स्फुरणप्रसद्याताः दशादयो ज्ञेयाः॥ त
थाच यवनेश्वरः॥ सूर्यं भागदशमे तृतीये सोमस्य जीवस्य तु पंचमे
शेै शुक्रस्य विंशे सधिसस के बुधस्य भागेतिथिके च नन्दनं॥ भौमस्य
विंशाष्ठयुते तु नंदविंशे तथा सूर्यं सर्तस्य स्वोच्चं॥ उदाहरणं॥ ४ भा
गादिति॥ चंद्रभागाः ५।११।२३।४२ द्विगुणः॥ दिघ्न ३२।०।४०।२४०
षष्टिलब्धमुपरि योज्यं ३२।३१।५४।० भागस्थाने षष्टिभक्तं लब्धशेषं
चंद्रोच्चं भवति ०।५३।७ नीचखेटांतरं ५।११।२३।४२। अंशं १६।२३
४२। त्रिहृतं लब्धं चंद्रोच्चं भवति॥ ॥ रविः ६।५।३९।४ रविनीचं ६।
१०।०।० नीचोनोर्कः ११।२५।३९।४ अयं षड्राश्यधिकोस्ति अतो भग

०।५३।४७

स्प
च

कृ
२२ उ हा०

कोणस्वगृहनिर्णयस्यैवापेक्षि तत्राच्चसंस्वर्णएववृषराशि
रिंदो स्त्रिकोणं॰ कन्यायांबुधस्यविंशसंशास्त्रिकोणं॥ परेद
शांशाः स्वगृहं॥ यत्रतुस्वोच्चरूपमिसादावुच्चमूलत्रिकोण
स्वभवनानांत्रयाणाप्यपेक्षाः॥ तत्रयथोक्तेवव्यवस्था
प नृथांबुधस्यहोराद्रेक्काण॥ सप्तमांश॥ नवमांशकः॥ अ
र्कांशास्त्रिंशादंशश्चसप्तवर्गइतीरितः॥ तत्रषड्गोवृह
ज्जातकेउक्तः॥ क्षितिजसिततत्त्वचंद्ररविसौम्यसितो
वनिजाः सुरगुरुसौरगुरवश्चगृहांशकैर्पः॥ अज पल
मगतौलिचंद्रभवनादिनवांशविधिर्भवनसमांशका
धिपतयः स्वगृहाक्रमशः॥१॥ अवनेति॥ द्वादशां एम

२३

स्थस्यगृहादिस्वामिनासमंमित्रत्वाभावान्नैमित्तिकंबलं
कथंस्यादधिकरणत्वात्॰ किंच॥ अस्यस्वोच्चसुहृदिस्वत्तिव
स्य स्वोच्चस्थः स्वत्रिकोणस्थः स्वगृहस्थः स्वांशकस्थः मि
स त्रगृहस्थितोबलवानिर्थोलिभ्यते॰नतुगृहस्वामिनिस्वोच्च
स्वमूलत्रिकोणादिस्थेवायंग्रहोबलवानिति॰ तस्माद्यथोक्त
मेवव्याख्यानंमनोरमं॰ उच्चमूलत्रिकोणस्वभवनसंदेहेनि
र्णयः सारावल्यामुक्तः॥ विंशतिरंशाः सिंहेत्रिकोणमपरे
म स्वभनंकर्मस्य [redacted]
उच्चंभागत्रितयंवृषइंदोः स्यात्त्रिकोणमपरेंशाः॥१॥
दशभागमेषेत्रिकोणमपरेस्वभंतुभोमस्यउच्चं लंक

न्यायां बुधस्य तुंगांशकैः सदाचिंसं॥ परतस्त्रिकोणजातं प
चभिरंशैः स्वराशिजं परतः॥ दशभिर्भार्गवस्य त्रिको
णकल्त्स्वभं परं चापे॥ शुक्रस्य तु तिथ्यंशास्त्रिकोणमपरं
स्वभं तु तुलायां॥ कुंभे त्रिकोणनिजभे रविजस्य रवेर्थो
सिंहे इति॥ ननु सप्तवर्गजबले उच्चबलानुक्ते रुच्चभावो बला
नि तु बुधे चंद्रे च ग्रह बलं किं स्थाप्यं॰ न च रूपं स्वतुंगे थानिज
त्रिकोणे पादेन रूपं स्वगृहे दलं स्यादित्यादिना सालुगि
पन्नतौ॥ सप्तवर्गजबलेष्युच्चबलस्योक्तत्वात्तदेव स्थाप्य
मिति वाच्यं॥ सर्वग्रंथविरुद्धत्वेन तस्यायुक्तत्वादिति राम
चेत्॥ अत्र केचित्॥ ग्रहबलमेव स्थाप्यं॰ बद्गादौ त्रि

शदंशव्यापित्वस्य गृहे स्थत्वादित्याहुः॥ वस्तुतस्तु॥ बहुगुण
कप्राप्तावधिक गुणकस्य हानिद्वयसमावेशेऽर्धहानेर्वा ऽधि
कत्वात्तथास्वीकारस्तथा प्रकृतेपि मूलत्रिकोणबलस्यैवां
शिकारोऽधिकत्वात्॥ प्रसासन्महच्चेतितत्वं॥ एवं चंद्र
स्य वृषराशौ मूलत्रिकोणबलमेव ग्राह्यं॰ न स्वाधिपतिस्था
दिसंबंधवशादन्यदपीति ध्येयं॥ न चैवं मुनिसंमतेष्वृ
क्षेष्वधिकत्वा॥ नीचे मित्रादिबलमेव स्थाप्यं॰॥ नीचे
त्वमिति विशेषोक्ते न तस्य बाधा॥ प्रत्युतेत्य मुक्तयो
द्वयोर्मध्ये धिकत्वं विनिगमकमिति महद्वैषम्यमिति
दिक्॰ यद्वा॰ उच्चबलस्य पृथगेवोक्तत्वात्स्वले तेमूलत्रि

हितानां कुजादीनां रश्मि निरस्तं॰ समुच्चयार्थकचशब्दानुपपत्तेश्च॰
के॰ नि समसमांशपतिर्यथा॰ ग्रहभागा मुनिघ्ना स्त्रिंशद्भक्ता॰ भवंति स
२३ मांशाः॥ ओजे स्वराशिः सर्वयुग्मे विंघ्यास्तु समसप्त दिति॰ अथ स
प्तवर्गबलार्थं प्रथमतः स्वाभाविकमित्रादयो ज्ञेयाः ते च बृह के॰
ज्जातकेउक्ताः॥ शत्रू मंदसितौ समश्च शशिजो मित्राणि शे
षा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शी
तगोः॥ जीवेंद्रुष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्की स
मौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे॥१॥
सूरेः सौम्यसितावरी रविसुतो मध्यः परे त्वन्यथा सौम्या
र्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी॥ शुक्रसौ

सुहृदौ समः सुरगुरुः सौरस्य चान्येरयो ये प्रोक्ताः सुहृदस्त्रिको
ण भवनात्ते मी मया कीर्तिताः॥ तदनंतरं अधिमित्रादयो ज्ञे
याः॥ तेच॥ अन्योन्यस्य धनव्ययायसहजव्यापारबंधुस्थिता
स्तात्कालिके सुहृदः स्वतुंगभवनेप्येके रयस्त्वन्यथा॥ एकानुक्ते
भाया सुहृत्समरित्वं संचिंत्य नैसर्गिकान्तत्कालैस्तु पुनस्तता रि
नधि सुहृन्मित्रादिभिः कल्पयेदिति बृहज्जातके उक्तं॥ अस्य
फलितार्थः॥ धुनाद्युक्तस्थानेषु स्थितो नैसर्गिकः सुहृदधि
मित्रं भवति॥ मध्यस्थो मित्रं॥ शत्रुर्मध्यस्थः॥ अनुक्तेषु स्थि
तानि सर्वासु हृन्मध्यस्थो भवति॥ मध्यस्थः शत्रुः॥ शत्रु
रधि शत्रुरिति॥ तत्र लग्नाद्व्यादयः केषु स्थानेषु संतीति
ज्ञानार्थं यथा लग्नाद्भवाः साधितास्तथोक्त्यर्थाश्चैवोदयः

को. २४

केंद्रस्थानेषु संनीतिज्ञानार्थं स्पर्शादिका साध्याः। एवं चंद्रादिभ्यो
पि भावाः साध्याः इत्यस्मद्गुरुचरणाः॥ तत्र रव्यादीनां भावसा
धनं यथा॥ यस्य ग्रहस्य भावाः साध्याः स यद्दोलग्नं प्रकल्प्य
रविरेव। रविः अनंतरमर्कस्य भोग्यस्तनभुक्त्वयुक्तो मध्यो
दयाढ्यः समयो विलग्नादित्यादिना इष्टकालः साध्यः त
स्मात्तत्तत्स्था भावाः ससंधयः साध्याः॥ ॥अथ वान्यथा ग्र
हभावसाधनं॥ ग्रह एव रविः कल्प्यः तस्माच्चरमानीय
रात्रिदलं कार्यं ग्रहं रविं प्रकल्प्य रात्रिदलमिष्टकालं च प्रक
ल्प्य यत्तु लग्नं कोदये लग्नं साध्यं सं चतुर्थभावो भवति। स
षड्राशिके दशमभावो भवति। ग्रहः प्रथमभावो भवति।
ग्रहः षड्राशिकः सप्तमभावो भवति। एभ्यश्च तुर्भ्यः प्राग्व

प्राग्वत्परस्पर्शः॥ होरे कैंद्रोरयुजि समभे चंद्रभान्वोश्च होरे द्रेष्का
णाः स्युः स्वभवनसुतत्रिकोणाधिपानां॥ त्रिकोणं। नवमं।
कुजरविजगुरुज्ञशुक्रभागाः पवनसमीरणकौर्प्यजूकसि
हः अयुजि। युजि च ते विपर्यस्ताः शशिभवनालिझषांतव
क्षसंधिः॥ ते अंशाः स्वामिनश्च विपर्ययस्थाः इत्यर्थः॥ तथा
चैंकृति कीर्त्तिः॥ पंचाथ पंचचाष्टौ सप्त पंच पंचैव वोजभ
वनेषु॥ ॥धरणिसुतमंदसुरगुरुज्ञशुक्राणां क्रमेणांशाः।
पंचैव सप्त चाष्टौ पंच पंचाथ युग्मभवनेषु॥ भागा भार्गव
शशिसुतसुरेज्यशनिभूपुत्राणामिति। एतेन भा[illegible]नां
सन्निहितत्वात्तच्छब्देन तेषामेव विपर्ययो ज्ञेयः। न तु व्यव

१

का.रा. तन्न॥ त्रिविक्रमाद्यैस्तु कृतेपि परमप्राचीनेन जातकमुक्ताव छ.दा.
२५ लीकारेण ग्रहभावानामुक्तित्वेन स्वीकरणीयत्वात् तत्
न थाचं लग्नभावानुक्ता तद्वाक्यं॥ एवं ग्रहेभ्यस्तत्तत्रूपखंडैः स
र्वाधथावत्समयं विदित्वा॥ रविद्युमानेनैतात्स्साधयांच न
भं नतः प्रोक्तवदेव भावाः॥ यद्वा ग्रहेभ्यस्तत्तत्रूपकैर्यो
निशार्द्धमर्कादिकसाधनीयं॥ तन्नाडिकाभिर्युचरादि
लग्नं तुर्यं ततो भावविधिर्विधेयः॥ प्रयोजनं तस्य द
शाक्रमो देवेंद्रादिगानामवबोधनं च॥ तत्कालमेषा
दिषु चात्र सम्यक्कृते यं बुधे योक्तिक समतत्त्वोदिति॥
केरकादिपरिभोषया नयाप्रोक्तया॥ सकलभाव
जातयति वगत्का॥ श्रीपतिनाप्यंगीकृता एव ग्रह

२५

२

भावाः॥ प्रतिबंदीग्रस्यं चनं॥ तत्रापि मते लग्नभाववशा
च्चक्रार्धहानिस्वीकारापत्तेः॥ न च भाववशेन चक्रार्ध
हानावेकराशावपि भावभेदाभिन्नस्थानस्थितेषु चरग्रहेषु स
र्वेषु चक्रार्धहानिः स्यात्तथैकराशीगानामिस्य एकभावगा
नामिसर्थस्यावश्यकरणप्रसंग इति बाधकमिति वाच्यं॥ इष्टा
पत्तेः न च स्वापत्ते शब्दप्रयोगे किं निस्यवाचकं प्रयोक्ष्यामह
ना इति न्यायेन एकभावगामिति विहाये॥ एकराशिगामिनमि
तिराशिपदप्रयोगः॥ प्राचांमेषादिपदवाचराशिलाभा
येवेति गम्यते॥ इतिवाच्यं॥ एवंस वर्धिसादिनाभावप्र
क्रमादनन्यगस्याराशीपदस्यभावपरत्वस्वीकारात्॥ न
नु भावनमत्ते भाववशाच्चक्रार्धहानी स्वीकाराप्रबंधि स्यात्॥ ति

के
२६

इतिचेन्न॥ सौम्येधारणप्रयोजनाभावेन भावप्रमाणेनेष्टिसा ६
धनस्य॥ रव्यघदशायां दशाक्रमबलसाधनस्यचांनंगीका
रात्॥ ग्रहभावानांत्वसाधारणंप्रयोजनंप्रागेवोक्तंनन्वेव
भावानांभावस्वीकारापत्तेरितिचेन्न भावेस्यापिस्थानव
शात्फलयोगस्यैवेष्टापत्तेः तद्भावेचापादकाभावादेव
तद्भावइसलपल्लवितेन॥॥ अथसस[illegible]गीदाहरणं॥ ॥स्व बु
र र्यादिशात्रुगहेअधिकोविभावाः स्पष्टधुयः राश्यंर्द्द १५।३६।
चरं३६५॥ चंद्रभावाः स्पष्टधयः राश्यर्द्द १४।१५चरं ४९अं॥

त	ध	स	बु	शु	रि	जी	म	ध	क	अ	व्य		त	ध	स	बु	शु	रि	जी	म	ध	क	अ	व्य
६	७	८	९	१०	११	०	१	२	३	४	५		०	१	२	४		५		७	८	९	०	५
५	५	५	५	५	५	५	५	५	५	५	५			५४	११	८	४	११६	११	८	५	[illegible]	११	
३९	[illegible]	४२	[illegible]	[illegible]	३९	[illegible]	४२	[illegible]	४२	२	[illegible]			२३	२५	३०	८	२५	[illegible]	२७	३०	३७	३०	२
४	०	१७	४५	५७	०	०	०	५७	४८	५७	०						३०		२३					
४०	[illegible]	२०		२०	४०	४	४०	२०	४०	२०	४०			४२	३९	२५	२	३	[illegible]	३	२४	५४	२४	४

२६

भावसंधिसाधनं॥ ततः प्राग्वत्सर्वभावकुंडलिकाकार्याः॥ त
तः स्वकुंडलिकायांतत्कालेनदशायबंधुसहजस्थोसेषु ॥१०।
११।४३।२।१२। मित्रस्थिताइति अधिमित्रादयोज्ञेयाः॥ अत्रकेचित्
प्राचीनेसिविक्रमनीलकंठश्रीपतिश्रीधरादिभिरनुक्तत्वाद्ग्र
हभावस्वीकरमयुक्तं॥ किंच॥ ग्रहभावस्वीकारे दृष्टिसाधन
मपिभावैरेवकार्यं॥ अपिच॥ लग्नाद्यदशायांलग्नाद्भावाः
संतीतिभावफलगुणितानिदशाक्रमबलानिस्वीकृतानि॥
एवंरविचंद्रयोरव्याद्यदशायांतयोर्भावसत्वाल्लग्नाद्यदशा
यामिवेतद्भावफलगुणितान्येग्रहबलानिदशाक्रमबला
निस्युः॥ नतुभिन्नरीत्या॥ तस्माद्ग्रहभावदेवभिन्न[illegible]दशाक्र
मबलसाधितमितिग्रहाणांभावस्वीकारेषुदूषणमाहुः॥

संधय:

६	७	८	९	१०	११	०	१	२	३	४	५	०	१	२	३	४	५	६	७	८	९	२	१०	११
२०	२०	२०	२०	२०	२०	२०	२०	२०	२०	२०	२०	१७	२४	२२	२४	२४	२४	२७	२७	२४	२२	२२	२२	२७
४०	५१	४३	५१	५१	४०	४०	५१	४३	४३	५१	४०	५५	५८	२	५८	५८	५८	५५	५५	५८	४	३	५८	५५
२	५८	५५	५५	५१	२	२	५१	५५	५५	५१	२	२३	४३	४०	४३	४३	४३	२२	२२	४३			४३	२२
२०		४०	४०		२०	२०		४०	४०		२०	३१	३१	३०				३०	३०	३१	७०	३१	३१	३१

रविभावकुंडली

चंद्रभावकुंडली

१ मं ६ बु ७ १० २ श ४ गु ५ ११ चं ९ रा १२ ८

२ श १२ ११ ३ ४ चं ९ १० गु ५ २ ७ ८ मं ६ बु शु

भौमभावा: संसंधय: राश्यंशै १६।७।३ च र ३ ध ५ ७ ध भा० सं० रा० १४।१० ५।१० ध

तं	ध	ल	कु	उ	रि	तो	म	ध	क	प्र	व्य	भा	ध	ल	कु	उ	रि	ला	म	ध	कु	अ	
६	९	१०	११	०	१	२	३	४	५	६	७	५	६	७	८	९	१०	११	०	१	२	३	४
२	१	४	७	४	१	२२	१	४	७	४	१	१९	१८	१८	१८	१८	१८	१८	१८	१८	१८	१८	१८
७	२६	५	४	२५	५६	७	५६	२५	४	२५	५६	५८	५८	५८	५८	५८	५८	५८	५८	५८	५८	५८	५८
१८	१६	१४	१२	१४	१६	१८	१६	१४	२२	१४	१६	२६	३१ २०	५२ ४०	६	३१ ३०	३१ २०	२६	३१ २०	५२ ४०	६	५२ ४०	३१ २०

के०

२८

८	९	१०	११	०	१	२	३	४	५	६	७	६	७	८	९	१०	११	०	१	२	३	४	५
१५	१८	२०	२०	१८	१५	१५	१८	२०	२०	१८	१५	३	३	३	३	३	३	३	३	३	३	३	३
२६	५	५४	५४	५	२६	२६	५	५४	५४	५	२६	५४	५४	५१	५०	५४	३२	३२	५४	१	५१	५४	३३
७	५४	५३	५४	५४	७	७	५४	५३	५३	५४	५२	३२	५४							५०			

अथ भौमकुंडलिका

१० मं ८ शु ६ ११ बु ५ १२ २ गु ४ श १ ३

बुधकुंडलीका

बु ७ शु बु ६ ५ गु ४ ८ ९ मं ३ २ १० ११ १२ चं १ रा

गुरुकुंडली

५ गु ४ चं ३ २ ६ ७ मं ८ १० ९ १२ ११ १

गुरु	भावाः	संधयः	रा	स्पष्ट	भ	१५ चा	१६५				
त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व्य
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

शुक्रभावासंधयः राश्यंशैः १४।१९चरं

त	ध	स	सु	सु	रि	जा	म	ध	क	अ	व्य
[illegible]	६ २७ [illegible] ५०	२० ५१ ५७	८ २० ५८ ५७ ४०	९ १० ५७ ५७ ४०	१० २० ५७ ५ ३०	११ २० ५६ १२	२० ५१ ५० २०	१ २० ५७ ५० २०	२ २० ५८ ५०	३ २० ५७ ५७ ४०	४ २० ५७ ५ २०
६ ५ ५६ ३९ १०	७ ५ ५७ ३१ २०	८ ५ ५८ २३ ५०	९ ५ ५८ २३ ५०	१० ५ ५७ ३१ ३०	११ ५ ५६ ३९ २०	० ५ ५६ ३९ १०	१ ५ ५७ ३१ ३०	२ ५ ५८ २३ ५०	३ ५ ५८ २३ ५०	४ ५ ५७ ३१ ३०	५ ५ ५६ ३९ २०

शनिभावाः ससंधयः राश्यंशैः १३५

त	ध	स	सु	सु	रि	जा	म	ध	क	अ	व्य
० २८ ५३ ५२	१ २५ ९ १९ २०	२ २१ २४ ४४	३ १९ ४० ५	४ २१ २४ ४४ ०	५ २५ ९ १९	६ २८ ५३ ५२	७ ५ ९ २६ ४४	८ २१ २४ ४४	९ ४० ५	१० २१ २४ ४४	११ २५ ९ १९ २०
१ २ १ ३४ ११	२ १९ १९ ५८ ३०	३ ४ ३२ २२ ५०	४ ४ ३२ २२	५ २९ १९ ५९ ३०	६ १२ १ ३४ ०	७ १२ १ ३४ ०	८ १९ १९ ५८ ३०	९ ४ ३२ ५२ ५०	१० ४ ३२ २२ ०	११ ८ १९ ५८ ३१	० १२ १ ३४ ०

शुक्रकुंडलीका

गु ७ ६ शु ८ ९ ३ १२ १० २ ११ चंशे

२ १२ ३ शचे गु ७ ६ ९ १० ४ ५ म

बुरशु

केशवि २८ २८

अथसप्तवर्गोदाहरणं ॥ ॥ सूर्योधिशत्रुगृहेधिशत्रुद्रेष्काणेधि-
शत्रुत्रिंशांशेचास्तितेनरूपस्परदांशोगृहबलं ०।१।५२।३० सूर्यः
स्वीयहोरायामस्तितेनरूपार्द्धहोराबलं ०।३०।० अधिमित्रसप्तमांशे
नवमांशेद्वादशांशेचास्तितेनत्रयईभांशाः ०।२२।३० सप्तमांशन
वमांशेनवमांशद्वादशांशबलं सर्वयोगेजातंरवेःसप्तवर्गजब-
लं १।४३।१।३० एवंजातानिग्रहाणांसप्तवर्गबलानि ॥

ग्रहाणांसप्तवर्गचक्रं ॥

										र	च	म	बु	गु	शु	श
श्री	र	च	म	बु	गु	शु	श	ल	ग्र	० ५२ ३०	० ३ ५	० ३० ०	० ४५ ०	० २२ ३०	० ७ ३०	० ५२ ३०
गृ	७ शु अधिश	१ मे शत्रु	८ स्व	६ स्त्र त्रि को बु	४ च अधिमि	६ बु सम	१ भौ अधिशत्रु	८	होरा	० ३० ०	० ७ ३०	० २२ ३०	० २२ ३०	० २२ ३०	० ५२ ३०	० ५२ ३०
हो	स्व च ५	५ सू सम	१ सू मित्र	५ न अमि	५ र अधिमि	५ र शत्रु	च ४ अधिश	चंद्र	द्रेष्का	० ५२ ३०	० ७ ३०	० ७ ३०	० ३ ५	० ३० ०	० ३० ०	० १५ ०

के.३
२८

	र.	चं.	मं.	बु.	गु.	शु.	श.
मित्राणि	चं मं गु	सू बु	र गु चं.	र शु	चं. मं. सू.	बु श	बु. शु
समः	बु	मं गु शु श	शु. श	मं गु श	श	मं गु	गु
शत्रवः	शु श	●	बु	चं.	शु बु	र. चं.	र. चं. मं.

	र.	चं.	मं.	बु.	गु.	शु.	श.
गु. मं.		र	र	र च			
मित्राणि	बु	श	शु	मं श	श	मं श	गु
समः	च	र बु	मं गु बु शु	शु	मं बु शु	बु श	बु शु
शत्रवः	म म शु	गु शु म	श	श			
अधिशत्रवः	शु श			च		र चे	र च

सर्वेषां सप्तवर्गजबलानि लिख्यते॥

अथ सप्तवर्गबलार्थं सुगमोपायो लिख्यते॥ स्वेभपा १६ धिसुहृद्घरे १८ हृता:४

समेक्षाघ्धरा व ध्या राविंदुः सिद्धाम्लत्रिकोण मे॥ तद्युतिर्दशने भक्ताः ५

सप्तवर्गोद्धजबलं॥ न्यासः १६।१२।८।४।२।१।२४ अथवा त्रिकोणे भक्ताः १२

३२८ सप्तमः

२८

द्रे	७शु अधिमित्र	५र सम	४च सम	१०श शत्रु	१२ स्व	२ स्व	९गु मित्र	५र बि	सप्त मांश	० २२ ३०	० ३० ०	० ३० ०	० १ ४२ ३०	२२ ३०	० ५२ ३०	[illegible]
स	८मं· अमि	स्व ४	४चं अ शत्रु	४ चं· अशत्रु	४चं अ मि	४चं· अशत्रु	७शु सम	२शु	नवमांश	० २२ ३०	० ७ ३०	० ७ ३०	० ३० ०	० ३० ०	१ ५२ ३०	१
न	८म अमित्र	५र सम	१२गु सम	२ स्व	१२ स्व	४अश शुच	९गु मित्र	७ शु	द्वाद	० २२ ३०	० ७ ३०	० १५ ०	० १५ ०	० ७ ३०	० ३० ०	१ ०
द्वा	९गु अमि	६बु सम	७शु मित्र	११श मित्र	३बु सम	स्व २	१२गु मित्र	६ बु	त्रिंशांशः	० ५२ ३०	० ३ ४५	० ३० ०	० १५ ०	० ७ ३०	० ७ ३०	३
त्रि	श अधिशत्रु	गु शत्रु	स्व	गु मित्र	मं· सम	श सम	शु सम	बु ध	योगः	१ ४३ ७ ३०	१ ७ ३०	२ २२ ३०	२ १३ ७ ३०	२ २२ ३०	१ २० ३७ ३०	१ ३ ४
	ग्रहाणास्वाभाविकमैत्रीचक्रं							॥	॥ तात्कालिकमैत्रीचक्रं ॥							
	र	च	म	बु	गु	शु	श	अधि	र	च	म	बु	गु	शु	श	

के
७०

समभंच·अंशश्चसमभांशमितिसमाहारद्वंद्वः॥ भांशमेव भांशकमि
तिस्वार्थेन अंशश्चसन्निधाति॥ समभंच अंशश्चासन्निधानात्
समभस्यैव·विषमे इत्यत्र भांशक इतिसंबध्यते·नचसमासार्थमे
ध्ये एकदेशस्यानुषंगोनयुक्त इतिवाच्यं·विशेष्यांशानुषंगेबाधकाभावात्·
यथा·अथशब्दानुशासनं·केषांशब्दानामित्यत्रानुशासनमित्यस्यानुषंग
स्थेलापि॥ग्रहेंद्र इत्युक्तचंद्रे·समभांशके·समभे·स्त्रीराशौ·तथास
मभस्यस्त्रीराशेर्नवांशेवाभवतस्तदाअंघ्रिरूपचतुर्थांशंबलंदद्यात्॥
ता॥स्त्रीराशौस्त्रीनवांशेचस्थितयोश्चरणद्वयंबलमर्थतःसिद्धं·प्रतिनि
मित्तंनैमित्तिकस्ययुक्तत्वात्·यत्तुवर्गोत्तमस्वराशिस्वनवांशस्वद्रेष्का
णरूपनिमित्तभेदसत्त्वेपिसत्त्वाद्विगुणमितिवराहमिहिराचार्यैरु
क्तं॥तदायुष्ययोग्यतारूपबाधात्·इहतुबाधकाभावात्स्त्रीराशौनवांशो

वा

राम
७०

मित्रभे ध्वय ॥ समे ष्विन्नारू वराविंदुरु धर्मे मध्ये रिभे थावा ॥ तदै
क्यमंगभ्र १६ भक्तं ससवर्गोद्भ्व जबलं ॥ स्ववेद ४ धी स्व भेस
मा ३ मित्रे द्वो २ समभे विधु १ ॥ अर्द्धत्रेराग्रहे पादो ध्यरि मे
गा निम्र लभे ॥ तदैक्यवसु भि भक्तं ससवर्गोद्भ्व जबलं ॥ न्या
सः ॥ अथ अन्यतस्थान बलभेदा पु २ स्व ३ अ मि स श शु श
स्त्रीराशि नवांशबलं ॥ तथा केंद्रादि बलं ॥ तथा द्रेष्काणं बलं
लं चाह ॥ ॥ शुक्रेंदु समभांशके हि विशमेन्ये द्धरं घ्रिं ५ बलं केंद्राद्येषु
चरूपकार्द्ध चरणान्? ६० ? ५ पश्चत्ति रवेशाः स्मा त्र ॥ स्त्रीरवे रौ चरमेनराः
प्रथमे के कुबो चम ध्ये तथा द्रेष्काणे वित्तरत्ति पाद शुद्धि स्यात्स्व
न वीर्यत्विदं ॥ ६ ॥ ॥ शुक्रेति ॥ शुक्रश्चंद्र श्च शुक्रेंदु समभांशके
[redacted]च अंशाश्च [redacted] भांशो भांशा एव भांशकास्तस्मिन् समभांशके
समोचतोभौरो

ष्याः स्मादिति लघुजातके॥ जातकसारवचनात्तु राशिनवांश
योरेव प्रत्येकं चरणबलस्योक्तत्वेन उभयत्रापि चरणं एव प्रत्येकं ब
लाभावश्चरणार्द्धगबलमिसस्याउक्तत्वात् अस्योदाहरणं॥ स्तर्य
स्त्रुलायां विषमराशावस्ति तेन पादो बलं १५ शुक्रः समराशौ वृन्या
यामस्ति तेन पादो बलं अथ च शुक्रः समराशेः कर्कस्य नवांशेस्ति
तेन पादो बलं एवं ज्ञातानि सर्वेषां पुंस्त्रीराशिबलानि लिख्यते॥

र	चं	म	बु	गु	शु	श
०	०	०	०	०	०	०
१५	०	१५	१५	०	३०	३०
०	०	०	०	०	०	०

अथ केंद्रादिबलसाधनं केंद्रेति
केंद्राद्यन्यं घंति तद्यथा केंद्रगाः रूपं मुतं
वृहज्जातके॥ ॥ सत्ताः सप्तमलग्न
चतुर्थखभानां केंद्रसंज्ञापणफरं
परतश्चसर्वमापोक्लिममिति च॥ केंद्रादिकं च भावप्रमाणेन।

न राशिवशात्। न च मेषादिराशेरेकस्य भावात्मके मुख्ये केंद्रे पण
फरे पि संभवादेकस्यैव पूर्णबलत्वं मध्यबलत्वं च विरुद्धं तथाष्टक
वर्गे लग्नाद्भावात्मके स्थाने गृहप्रमाणे मेषादिराशेरेकस्य भावद्वये
पि संभवादेकस्मिन् रेखा रेखाभावश्चोभयं लग्नस्तत्र विरुद्धम
तोत्र राशिस्वीकारेषु सुरकेग्रहबलेपि स एव युक्त इति वाच्यं बाध
मा कैन राशिबले भावप्रमाणे केंद्रादिस्थग्रहबले तत्त्यागे बाधकाभावात्॥
राशिबलवत् केंद्रादिस्थग्रहबलस्य समानार्थपदोक्तत्वमात्रस्याप्रयो
जकत्वात् इदं च केंद्राद्येषु रूपादिबलं केंद्राद्यंशतुल्यग्रहे गृहे ध्ये
यं अधिकोनके त्वनुपातादलसाधनं युक्तं तदुक्तं लालुगि
पक्तौ केंद्रादिगानां कुथमाब्धिभक्तं क्रमेण यद्भावफलं बलं

के. उ.

२२

स्यात् ॥ सोमोदरप्रकृताबपि ॥ कूटकादिगतानां च बलं पेच विशे
ष कः ॥ त्रिघा: स्वर्लसंयुक्ता: स्वाघिणारहिता: क्रमादिति
संप्रदायानुसारेण खोदाहरणं ॥ रविचंद्रबुधशुक्राः कूटे तिष्टं
ति तेन रूपं बलं ॥ गुरुशनी पणफरे तेनार्द्धबलं ॥ भौमश्च आपो
क्लिमे तेन पादो बलं एवं जातानि सर्वेषां कूटकादि बलानि

थ लिख्यंते ॥ अथ द्रेष्काणबलं ॥ स्त्रीखेटा ॥ चंद्रशुक्रो चरमे

सू	चं	मं	बु	गु	शु	श
१ ० ०	१ ० ०	० १५	१ ० ०	० ० ०	० ०	० ०

तृतीये द्रेष्काणे स्थितो पादं च तुर्थो
कूटकांशबलं विस्तरतः नराः गुरुभौ
दिबलं
पादं लं विस्तरं ति ॥ क्लीबो ॥ नपु
मार्का: प्रथमे द्रेष्काणे स्थिताः
सको बुधशनी ॥ मध्ये ॥ द्वितीये द्रेष्काणे स्थितौ पादं बलं पृच्छतः ॥
इद पूर्वोक्तपंचधास्थान वीर्यमुदितं उक्तं ॥ स्त्रीग्रहादिस्व राम

३२

ब

चसति चरणक्षमेव ॥ एवं अन्योरपि कुर्ने न्यूशनिस्ता: विषमे भांशके
विषमेषु रूपरा शेषु रूपराशे नवांशे च पादं बलं दद्युः उभयत्र चरण
द्वयं ॥ अंशास्य युग्मो जस्त्वं रूपतो ॥ नगणनया ॥ तेन वृषस्य द्वितीय
नवांशे कुंभस्य स्थितस्य रव्याद्यन्यमस्य द्वितीयनवांशस्य युग्म त
त्वादंघ्रिबलं स्यात्तथा तृतीये नवांशे मीनाख्ये स्थितस्य न
वांशस्य विषमत्वादंघ्रिबलं स्यादिति भ्रमो निरस्त: केचित्तु
समराशौ ॥ समनवांशे च स्थितानामंघ्रिरेव बलं ॥ न चरणद्व
यं ॥ प्रसेकूम स्थिघ्रि: ॥ अथवा बलाभाव: ॥ अथवा चरणार्द्ध
बलमिति वदंति ॥ तन्न ॥ चंद्रसितो स्त्रीक्षेत्रे पुपुरुषक्षेत्रोप
गा: शेषा: ॥ तथा स्त्रीपुंराशिनवांशके शशिसितो शेषा बला

के॰उ॰ लग्नं शोध्यं इनात्॥ सूर्यात्॥ कुजात् भौमात्। हिबुकं चतुर्थं
२२ शोध्यं॥ विधोश्चंद्रात्। भार्गवात् माध्यं दशमं शोध्यं॥ ज्ञात् बुधा
त्। गुरोश्च। अस्तं सप्तमं शोध्यं। शेषं स्वभात् पृष्ठं। षड्भाद्द्विकं। धि
नदा चक्रतो द्वादशराशिभ्यस्त्यजेत्। शोधयेत्। षड्भाल्पं चेद्यथा
स्थितमेवेत्यर्थः। ततः सिद्धं तद्राश्याद्यं रसहृत्। षड्भक्तं रूपाद्यं॥
दिग्वीर्यं। दिग्बलं भवतीत्यर्थः॥ भजनप्रकारश्चोच्चबले उक्तः॥ अ
थास्योदाहरणं॥ लग्नं ८।२२।४।१३ मंदात् ७।२८।५३।५२ भा
शोधितं ४।६।५।१८ इदं रसन्यूनं जातं यथास्थितमेव। रस
हृल्लब्धं॥ शनिदिग्बलं रूपाद्यं ०।४२।२ एवं सर्वेषां जाता
नि दिग्बलानि क्रमेणालिख्यंते॥ अत्र सुगमोपायः॥
यहाद्यथोक्तं संशोध्य भावं षड्भाधिकं त्यजेत्॥ चक्राद्भागा राम
२२

रूपमुक्तं वृहज्जातके॥ बुधस्त्र्यंसुलोन पुंसकाख्योशशिशुक्रौयुवती
नराश्चशेषाइति उदाहरणं॥ रविः प्रथमेद्रेष्काणेऽस्ति अतः पादोबलं॥
शुक्रस्तृतीयेद्रेष्काणेऽस्ति अतः पादोबलं बुधोमध्ये द्रेष्काणेऽस्ति
अतः पादोबलं॥ एवंजातानि सर्वेषांद्रेष्काणबलान्येकत्रलिख्य
ते॥ अथ शोध्योपस्थित्यर्थं पंचापि स्थानबलानिचलिख्यंते॥
एवंपंचविधं स्थानबलमुक्त्वा क्रमप्राप्तं
ब द्वितीयषड्बलंभेदं दिग्बलमाह॥ ॥

र	चं	मं	बु	गु	शु	श	द्रेष्काण
० १५ ०	० ० ०	० ० ०	० १५ ०	० ० ०	० १५ ०	० ० ०	बलं

मंदाल्लग्नमिनात्कुजाद्बहिभुकंरौथ्युंविधोभार्गवान्माथ्यंतात्गुरु
तोपमत्ररसभाश्रुएंत्यजेत्र्यक्रतः॥ शिवीर्यरसहृत्तथोसम
युजंरूपसहास्याद्दिग्बलंकुक्रतचनतोत्रतेत्रिलिक्कुजार्की
णांपरेषांबले॥ ७ ॥मंदाशिते॥ ॥मंदात्शनैश्चरात्॥

के.उ.
२४

शात्रिकुजार्किणां। चंद्रसौमशुक्राणां बलं स्यात् उन्नतं। त्रिंश
द्भक्तं यल्लब्धं तदेव परेषां [illegible] रविगुरुशुक्राणां रूपाद्यं बलं भव
ति। उदाहरणं। नतं ०।१० त्रिंशद्भक्ते च लब्धं रूपाद्यं जातं शशिकु
जार्किणां बलं ०।०।२० उन्नतं २९।५० त्रिंशद्भक्ते लब्धं रूपाद्यं जा
तं परेषां बलं ०।५९।४० एवं जातानि सर्वेषां दिनरात्रिबलान्ये
कत्र लिख्यंते। अत्र युग्मोपायः

र	चं	मं	बु	गु	शु	श	दिनरात्रि
५९ ४०	० २०	० २०	० ०	५९ ४०	५९ ४०	० २०	बलानि।

शशांकभौमसंदानां नतं द्विघ्नं बलं
फलाः॥ षष्ठिशुद्धं नतं [illegible] दन्येषां। सदा रूपं बुधस्य तु॥ अथ द्वि
बल तीयं कालभेदं पक्षबलाख्यमाह॥ ॥ शुक्ले सितिथि १५ ह
ते ष्यतिथयो वीर्यसतोंश १ युतं पापानां हि गुरुणां विधोरि
दमथोनं स्वं स्याकेषु क्रमात्॥ सौम्या कीर्तिवां निशः श
राम
१४

शिसितारा णां च रूपं सदैज्य स्याथां घ्रिचयाद्बलांकिलसमाप्ता
साधुरोरेश्वरः॥ ८॥ शुक्ले सति॥ शुक्ले शुक्लपक्षे। अन्ये कृष्ण
पक्षे। गतेष्यतिथयः क्रमेण तिथिहृत् पंचदशा भक्ताः फले
सतां शुभानां चंद्रबुधगुरुशुक्राणां रूपाद्यं पक्षबलं भवति।
तदेव रूपच्युतं। पापानां। रविभौमसंदानां बलं स्यात्॥ एतदुक्तं भ
वति। शुक्लपक्षे जन्मसमयपर्यंतं प्रथमं गततिथयः सावयवाः
ग्राह्याः कृष्णपक्षे। जन्मकालादारभ्य एष्यतिथयः सावयवाः
ग्राह्यास्ताश्च। यदि स्वेष्ट[illegible]तिथिघटीयोगप्रमाणेन एताः सा
वयवा गततिथयः अथवा सावयवा एष्यतिथयस्तदा षष्ठि
सा प्रमाणेन[illegible] इत्यनुपातेन गतेष्यतिथयः पश्चात् षष्टिप्रमा
णेन साध्या अथवा प्रथममेव षष्ठिप्रमाणेन साध्याः॥

के० उ०
३५

तद्यथा। शुक्लपक्षेष्टमैंदुः कृष्णपक्षे चंद्रः ०।१४।२३।४२ सूर्यात्
०।५।३७।४ ऊनितं ५।२९।१५।२२ लब्धाः ७।१५।२२ द्वाद
शा १२ भक्ताः फलं गततिथयः १४ शेषं ३।१५।२२ पंचघ्नं १५
७५।११० षष्ट्यामुपरियोज्यं १६।१६। क्रमेण गततिथिघटि
कापलानि भवंति १४।१६।१६ अस्य पंचदशभक्ताः सतांवी
र्यं भवति ०।५७।५० रविचंद्रलवाः द्वादशभिर्भाज्याः फलं गतति
थयः॥ गतेष्य रूपं शेषं पंचघ्नं। नैजे कालपर्यंतं जन्मकाला
द्गे क्रमेणोतिष्यातिथयो सावयवा भवंति ताः पंचदशभक्ताः
सतांवीर्यं भवति। रूपाच्छोधितं पापानामि। लेखा... स्य प्रकारः॥
अर्थांतरो... त्प्रकारेण साधितं... नां केंद्रं... रांभव
तीति सर्वेषामेतस्माद्वर्ष... वर्त्तमानोऽभ्यासोऽपारत्नभा। तथा राम
३५

ग्रहाः	सू०	चं०	मं०	बु०	गु०	शु०	श०
उच्चबल	१ २३	० ५३ ५८	० ४० २२	० ५८ ४५	० ५२ २२	० २ २	० २ ५२
सप्तवर्गजबल	१ ४३ ७॥	० ७ ३०	२ २२ ३०	१ ३३ ७॥	२ २२ ३०	१ २० ३७॥	१ ३ ४५
युग्मभांशबल	० १५ ०	० ० ०	० ० ०	० १५ ०	० ० ०	० ३० ०	० ३० ०
केन्द्रबल	१ ० ०	१ ० ०	० १५ ०	१ ० ०	० ३० ०	१ ० ०	० ३० ०
द्रेष्कोलबल	० १५ ०	० ० ०	० ० ०	० १५ ०	० ० ०	० १५ ०	० ० ०
बलं पंचानां योग	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	५२
दृग्बलानि	० ५१ ३८	० ५६ ३५	[illegible]	[illegible]	[illegible]	[illegible]	० ४२ २

दिनेत्र्यंघ्रे दिग्ध्मांशाबलं स्मृतं।
अथवा भावयथोक्तं संशोध्य
षष्ठेरस्य भाधिकं। चक्राद्विशो
ध्यतस्यांशाद्विभक्ताः दृग्ब
लेकलाः॥ अथ कालबलभेदे
प्रथमं दिनरात्रिबलाख्यमाह।
अथो इति। अथो दिग्बला
नंतरं समयजं कालबलं उच्य
ते इति शेषः॥ विदः। बुधस्य।
सदा। दिवारात्रो। रूपमेव बलं
स्यात्। नक्तं निशायां इंदुक्तं। लब्धं।

कु. उ.
३६

स्य बुधस्य शुभत्वात् शुक्लपक्षे शुभबलारंभे मध्य एव पापयोगा
त्पापत्वेनापरिपूर्णस्य शुभबलस्य नाशः पापबलारंभो भवती
ति वक्तव्यं। न चैतत्संभवति तथात्वे तिबहुत्वसितगताः स्यु
शुक्रसौम्याः क्रमेण सादिनाशुभानां पौर्णमास्यंते बलहृ
र्णता। अमांते बलाभावः पापनाम मांते बलपूर्णता। पौर्णमा
स्यंते बलाभावः ~~सादिनाशुभानां पौर्णमास्यंते बलहूर्णता।~~
~~अमांते बलाभावः पापानाम मांते बलहूर्णता। पौर्णमा~~
~~स्यंते बलाभा~~ इदं सादि शुभपाप साधारणपक्षबलं व्य
वस्थाभावसदपेक्षाः क्वापिकत्वात्। एवं कृष्णप्रतिपदादौ प ना
क्षबलाभावश्चेष्टाबलाभावश्च स्यात्। स च प्रत्यक्षविरुद्धः॥ राम
एवं च चतुर्थ्यामौमयहोवा। कुजवर्ज्य जो तु पापो शुभाः शुक्रः ३६

शांक जीवाः॥ सौम्यस्तु सौम्ययुक्तो मा श्रितोऽन्यैः पापैश्च
तुल्यफलाति त्वमेतागतैः यवनेश्वरवाक्याच्च द्राय शुभत्वमेव बुध
स्य तु भयरूपत्वमिति कस्यचिदर्द्ध रजत्वं करणं॥ तदपि पूर्वोक्तदो
षेणनिरस्तं। जातकादौ तु तयोः पापत्वकथनमरिष्टाद्यशुभफ
लार्थं। न तु बलसाधनार्थमपि॥ एवं च पद्धतौ सर्वत्रादिग्बलान
यने च क्रमाद्धानौ। क्रूरेत्त्वग्नगेहानौ च क्षीणचंद्रपापयुक्तबुधयोः
शुभत्वमेवेति ध्येयं। अतः क्रूरेव लग्न साहिते। इत्येतद्बृहज्जात
के श्लोकव्याख्यानावसरे उत्पलेरन्न क्रूरशब्देन क्षीणचंद्रमा
न ग्राह्य इत्युक्तं॥ तस्मात्क्षीणचंद्रपापयुक्तबुधौ शुभावेव॥ पा
पत्वेन सार्गिकारविभौमराहुनयोद्वयोरिश्च सम इह चरणोक्तमेव सा
धीयः॥ अस्योदाहरणं॥ कृष्णपक्षे जन्मनः सत्वाज्जन्मकालादेष्य

के॰उ॰

साद्यवास्तिथयः १४।७।२५ तिथि १५ भक्ताः फलं रूपादिशुभा
नां पक्षबलं ०।५९।७६ इदं रूपाच्च्युतं जातं पापानां पक्षबलं ०।२।५१
एवं जातानि सर्वेषां पक्षबलान्येकत्रालिख्यन्ते ॥ अत्र मदीयः सु
गमोपायः ॥ शुक्लगताः परे गम्याः स्तिः शुभानां पक्षजं वीर्यं पापानां

ग्रहाः	र	चं	मं	बु	गु	शु	श
पक्ष बलं	०।२।५१	५९	५२।३	५९	५९	५९	२।५१

षष्टिशोधितं ॥ प्रकारांतरं ॥ [illegible]
अर्कः ९।५।३०।१४ चंद्रः ०।१४।२३।४२
स्यर्कश्चंद्रः ५।८।१४।३८ षड्भाद्धिकः चक्रात् १२ शोध्यः ५।२१।
१५।२२ लब्धं ११।१।५२ द्विघ्नः ३४२।३०।४४ भक्तः ३४२।०।३०।०
४४० षष्ट्यामुपरि योज्य ५९।५।७ पक्षबलानि शुभग्रहाणां वीर्यं भ
वति ०।५९।५ षष्टि ६० शोधितं पापानां वीर्यं भवति ०।२।५५
एवं प्रकारेण ज्ञातव्यं ॥ व्यर्कश्चंद्रो धिकः षड्भाद्धश्चक्रात्[illegible] वा

राम ३७

२

शेषास्तिथयः ७।४१।३ द्व्यथवा प्रथममत एवं षष्टिप्रामाणेन साधितास्त
तिथयः १५।१६ पंचदश भक्ताः जातं ग्रंथांतरोक्तसमं पक्षबलं ०
५९।५ इदं आगतं पक्षबलं ॥ विधोश्चंद्रस्य ॥ द्विगुणं कार्यं ॥ बीजं चा
ग्रे स्फुटी भविष्यति ॥ अत्र क्षीणचंद्रः पापयुक्तो बुधो पापग्रहा इ
ति प्रांचः ॥ तच्चिंत्यं ॥ तथा सत्यमांते चंद्रस्य रूपं पक्षबलं स्यात् ॥
द्विगुणं विधोरित्युक्तत्वाच्चेष्टाबलमपि चंद्रस्य पक्षबलेन तुल्यं रू
पमेव स्यात् ॥ न चेष्टापत्तिः ॥ ग्रहचेष्टायाः पादद्रामानं बलं चेष्टा
बलं ॥ तस्य चामांते गणितेनानुपलंभात् ॥ किंच ॥ भवन्मते ॥ शु
क्लपक्षे शुभस्य चंद्रस्य क्रमेणोपचितं बलं ॥ पौर्णमास्यां तत्परमं
भवति ॥ ततः कृष्णप्रतिपदादौ संप्रति शुभस्य बलस्य नाशः
पापबलस्य चारंभो भवतीति वक्तव्यं ॥ न चेत्तद्युक्तं ॥ एवं केवल

के॰उ॰
२८

त्रयाणां क्रमेण। तथा त्रेधा विभक्तास्याः निशाः रात्रेः त्र्यंशकेषु।
प्रथमद्वितीयतृतीयेषु जन्मनि। राशिशिलारासां। चंद्रशुक्रभौ
मानां क्रमेण रूपं बलं स्यात्॥ सदा। सर्वदा। इज्यस्य। गुरोः। रूपं
बलं स्यादित्यर्थः॥ उदाहरणं॥ अत्र दिवसस्य द्वितीये त्र्यंशे ज
न्मास्ति। अतोऽर्कस्य रूपं बलं स्यात्। गुरोरपि रूपं बलं। सदेज्यस्ये
त्युक्तत्वात्॥ एवं जातं त्रिभागबलं लिख्यते॥ अथ चतुर्थं का

र	च	मं	बु	गु	शु	श	ग्रहत्रि-
१	०	०	०	१	०	०	भागबलं

लबलमब्दवर्षादिबलानाह।
अथेति। अंघ्रिचयाप्तौ ह्रध्यास
मामासधुहोरेश्वरः बली स्यात्। आसमिप्रापये एकवचनं। ए
तदुक्तं भवति। वर्षाधिपस्य एकः पादो बलं। मासाधिपस्य पा
दद्वयं। दिनाधिपस्य कालहोरास्ति तस्य रूपं बलं इति॥ वर्ष

दिना

पात्र यँज्ञ समये यस्य

द
राम
२८

स मासहोरयोरानयनमाह॥ द्विघ्नेति। अद्युपिंड इति संबंधः। द्यु
